Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# युगादिवन्दना




मुनिश्री धरणेन्द्र सागर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# युगादिवन्दना

मान्याः ?

शान्त्याद्यनेक गुणगणालंकृत श्रीमदाचार्यः कैलासाब्धिकल्याणद्मम् पादानाम् शुभे शोभने मुहूर्ते यद् संकल्पितं तद् कृपया पूर्णमद्य । भारतीभाषानिबद्धायां स्तवनरस रसिकाणांस्वभाव विशुद्धयादिमुद्दिश्य पूर्वकालीन श्रुतस्थविर महापुरुषैः प्रणीताश्च गेयात्मकः स्तवन-स्तोत्र-स्तुत्यादिः एवोद्धृताः । अस्मिन् पुस्तके प्रमादादि दोषवशान्मति भ्रमाद वा

काश्चनासूटयोऽवशिष्टास्ताम् शिष्टैः संशोधनीया संसूचनीया श्च ।

विधायकृपाम् कृपाकांक्षी पद्मसागरान्तेवासी

धरणेन्द्रसागर

युगादि पुरुषेन्द्राय नमोनमः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

| | वीराब्दाः | विक्रमसंवत्सरम् | खिस्तिसन् |
|---|---|---|---|
| प्रारब्धम् | २५०१ | २०३१ | १९७५ |
| समाप्तम् | २५०२ | २०३२ | १९७६ |

© लेखक के स्वाधीन

प्रतयः—रुक्सहस्त्रः... ...मूल्यममूल्यम

संग्राहक—प्रकाशयित्रि मुद्रक श्रीसीमंधर स्वामि जिन मंदिर संस्था, महेसाणा।

२३००-०० श्री वर्धमान जैन श्वेताम्बर मूर्तिपूजक संघ, उस्मानपुरा, आश्रमरोड अहमदाबाद-१३

२०२९-०० पुरुषादानीय पार्श्वनाथ जैन संघ, देवकीनंदन सोसायटी, अहमदाबाद-९.

१५००-०० चौपाटी जैन संघ, बम्बई.

७००-०० अनुपम सोसायटी, नारणपुरा, अहमदाबाद.

३००-०० सेरगढ जैन संघ, राजस्थान.

मुद्रक : के. भीखालाल भावसार
श्री स्वामीनारायण मुद्रण मंदिर
४६, भावसार सोसायटी,
नवावाडज, अमदावाद-१३.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# શુભ કામના

વિદ્વાન મુનિરાજ શ્રી ધરણેન્દ્રસાગરજી મહારાજે "युगादिवन्दना" માં આદીશ્વર ભગવાનને વંદના, તેમના શ્લોક, સ્તુતિ, સ્તવન, સ્તોત્ર વગેરે સંસ્કૃત ગીર્વાણ ભાષામાં પૂર્વાચાર્યોની ઉત્તમ રચનાઓમાંથી મધુસંચય કરી સામૂહિક અદ્વિતીય સંકલન કર્યું છે.

'પૂર્વાચાર્યોની રચનામાં અપૂર્વ વિશેષતા રહેલ છે. શબ્દ, ભાવ, દ્રવ્યની પવિત્રતા, ઉત્કૃષ્ટ શબ્દસંયોજન, દિવ્ય ધ્વનિ, સ્વયં રાગિણી અને અપૂર્વ ઉલ્લાસ તેમાં છે. તે વાંચતાં હૃદયમાં દિવ્ય ને ભવ્ય ભાવોલ્લાસ જન્મે છે.

આ કલિકાળમાં પરમાત્માની પ્રાપ્તિ માટેની અદ્દભુત કળા ભક્તિમય પ્રાર્થના–સ્તવનમાં હોય છે. પરમાત્માનું કીર્તન સરળ સાધન છે. તેમાં પૂર્વાચાર્યોના સંચય સદ્દભાગી આત્માને માટે એક અપૂર્વ ટોનિક છે. તેનામાં હૃદયની વીણાને ઝણઝણાવી મૂકવાની શક્તિ છે. તેનું વારંવાર રટણ દિવ્ય સંગીતને જન્માવે છે.

આ રચનામાં રણકાર છે, ભાવ–ઊર્મિના અવનવા પ્રવાહો છે. તે અંતરમાં સ્નેહની સરવાણી ઉત્પન્ન કરે છે.

વિદ્વાન મુનિએ કરેલ પ્રયાસ સ્તુત્ય ને ધન્યવાદને પાત્ર છે. આમાં કરેલ મધુસંચય આત્મગુણોનું સર્જન કરે તેવી શુભ ભાવના.

વંદના આત્મવિકાસનું પ્રથમ સાધન છે. પરમાત્માને ભાવપૂર્વક વંદન કરવાથી સ્વયં પરમાત્મા બની જવાય છે.

युगादिवन्दना ઋષભદેવ–જે યુગની આદિના પ્રથમ તીર્થંકર છે–તેમને કરેલ વંદના યથાર્થ છે. આરંભમાં કરેલ વંદના સર્વ તીર્થંકરો પ્રતિ વિનય, વિવેક, નમ્રતા બતાવે છે. તેથી ધર્મપ્રવેશ થાય છે. સ્તવન–સ્તુતિ–સ્તોત્ર દ્વારા ધર્મપ્રવેશ કરીને સ્વયં પૂર્ણ કરવાની અમર આશા છે.

જૈન ઉપાશ્રય, ઉસ્માનપુરા. पद्मसागर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# સામાન્ય વાત

વિશ્વ સાહિત્યના ચોકમાં નજર કરીએ તો સંસ્કૃત-પ્રાકૃત-અપભ્રંશ ભાષા જેવી અનેક ભાષામાં આદિકાળથી ઘણું ઘણું લખાયું છે. તેના વિષયો-ક્ષેત્રો પણ અનેકાનેક છે. સ્તુતિ-સ્તોત્ર ને સ્તવન પણ તેનું એક આગવું અને સુપેરે ખેડાયેલું ક્ષેત્ર છે. વેદ ગ્રંથોમાં પણ અનેક સ્તુતિઋચા મળે છે. આ સ્તુતિસંગ્રહ, જેને કેન્દ્રમાં રાખીને તૈયાર કર્યો છે, તે ઋષભદેવની સ્તુતિ વેદમાં પણ મળે છે.

સાહિત્યમાં સ્તુતિને સદાકુમારી કહી છે. જે તેને ઇચ્છે છે તેને તે વરતી નથી; જેને વરવા એ ઉત્સુક છે તે તેના પ્રત્યે નિરીહ છે. આદીશ્વર ભગવાનની ભિન્ન ભિન્ન કર્તાએ ભિન્ન ભિન્ન છંદમાં વિભિન્ન પ્રકારે કેવી સ્તુતિ કરી છે તે આ નાનકડા સંગ્રહમાં જોઈ શકાશે. આદીશ્વર ભગવાન અને સિદ્ધગિરિજી એ પરસ્પર ખૂબ સંકળાયેલા છે. એટલે આદીશ્વરની સ્તુતિ કરવાની વેળા આવે એટલે સિદ્ધગિરિ યાદ આવવાના જ, ને તે નિમિત્ત પામીને ગિરિરાજની પણ સ્તુતિ થવાની. અહીં ગિરિરાજની પણ સ્તુતિઓ મળે છે.

બીજા તીર્થંકરની સ્તુતિ કરતાં આદીશ્વર ભગવાનની સ્તુતિ કરવામાં કવિઓને વધુ આનંદ તો એ આવે છે કે આદીશ્વર ભગવાનને જટા હતી, એક મૂઠી વાળ હતા, તેને કેન્દ્રમાં રાખીને ખૂબ કલ્પનાઓ, ઉત્પ્રેક્ષાઓ, ઉપમાઓ ખૂબ છૂટથી પ્રયોજે છે. એ જ લટને કોઈ વેલડી કહે છે, કોઈક પોતાના લાંછન-રૂપ વૃષભને નીરવા માટેનું ઘાસ કહે છે-એમ ભિન્ન ભિન્ન કલ્પનાઓ કરી છે. શ્રી કેસરિયાજી એ નામ પણ આ કેસરા એમના ખભે હોવાથી પડ્યું; કાશ્મીર દેશમાં ઉત્પન્ન થાય છે તે કેસરને આ નામ સાથે નિસ્બત નથી એમ કેટલાક વિચારકો કહે છે.

આ સંગ્રહમાં પૃ. ૮૮ ઉપર જે સમસ્યાપૂર્તિ છે તે નોંધપાત્ર છે 'निला तुष तटकोणे कीटिकोष्ट्रं प्रसूता' એ એક પંક્તિ બે વાર વિભન્ન અર્થમાં પ્રયોજી છે, સંગ્રહ આવકારલાયક છે જ. જો તેમાં આવેલી મુદ્રણની અશુદ્ધિઓ યત્નથી નિવારાઈ હોત ને વિષમ શબ્દોના અર્થ આપ્યા હોત તો વિશેષ ઉપાદેય બનત.

મુનિ પ્રદ્યુમ્નવિજય
એક શ્રુતોપાસક

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युगादि पुरुषेन्द्राय युगादि स्थिति हेतवे ।
युगादि शुद्ध धर्माय युगादि मुनये नमः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# કિંચિત્

સર્વજ્ઞપ્રભુના શાસનમાં આરાધના અનેક યોગો છે—અનેક માર્ગો છે. જિન પ્રણીત પ્રત્યેક યોગો મોક્ષમાર્ગના પરમ આલંબન સ્વરૂપ છે. તેમાં ભક્તિયોગની વિશિષ્ટતા છે કે આબાલવૃદ્ધ સૌ તેના આરાધક બને છે. જિનેશ્વરની ભક્તિનો યોગ મોક્ષદાતા તો છે જ પણ સમાધિનો શ્રેષ્ઠ ઉપાય છે. જગતની ભૌતિક વિષયો તરફની આંધળી દોટને નાથવા ભક્તિ સર્વશ્રેષ્ઠ ચાબુક છે. આપણા જેવા કંઈક પામર જીવોને તારવા પૂર્વાચાર્ય ભગવંતોએ ભક્તિના સ્તુતિ-સ્તોત્રો-સ્તવનોનું એક વિશાળકાય સાહિત્ય બનાવ્યું છે. પ્રસ્તુત ભક્તિસંગ્રહની સ્તોત્રોની વિશિષ્ટતા એ છે કે આમાં પ્રથમ તીર્થંકર ઋષભદેવ પ્રભુના ચૈત્યવંદન સ્તુતિ-સ્તોત્રોનો અનેરો સંગ્રહ છે. સ્તવન-સ્તોત્રો તરફ ઊડતી નજર કરનાર કોઈ પણ ભક્તિપ્રેમી આ પુસ્તક લઈ ભક્તિની અનોખી મસ્તી માણી શકશે. સંસ્કૃત ગિરાના અભ્યાસીને ભક્તિ સાથે સંસ્કૃત સાહિત્યની એક અનુપમ વિશિષ્ટતા આ સંગ્રહમાં જોવા મળે છે. સ્તોત્રો વાંચતાં આધુનિક માનવની બુદ્ધિનો ગર્વ ક્યાંય ઓગળી જાય છે. આ પુસ્તકમાં સંગ્રહ કરાયેલા સ્તોત્રો એક અભ્યાસ માંગે છે. આ સ્તોત્રો પર ચિંતન કરે તો એક અદ્‌ભુત પ્રકાશ સર્જાય.

આ પુસ્તકના સ્તોત્રોનો રસાસ્વાદ મને ક્યાંથી મળે? પણ અમારા પૂ. તારક ગુરુદેવની પાવન નિશ્રામાં અનેક પ્રકારનાં શાસન સેવાનાં કાર્યો સદૈવ થાય છે. પૂ. ગુરુદેવે આ ગ્રંથના પ્રુફ-સંશોધનનું કાર્ય મને સોંપ્યું પણ પહેલાં તો અલ્પ-બુદ્ધિએ જ ગતિને રોકી. બીજી મુશ્કેલી પ્રેસ કોપી ઘણી જ અશુદ્ધ હતી. ત્રીજી મુશ્કેલી મૂળ પ્રતોનો અભાવ. તેથી પ્રુફ-સંશોધનમાં સારા પ્રમાણમાં ત્રુટિ રહી છે. જે કાંઈ સારું છે તે દેવગુરુની કૃપાનું પરિણામ છે. ત્રુટિ મારા પ્રમાદના કારણે છે.

પ્રાંતે આ પુસ્તકના સંગ્રાહક-પ્રકાશક-વાચક-અનુમોદક-ચિંતક સૌ ભક્તિના યોગે '**जैनं जयति शासन**'નો નાદ વિશ્વમાં ગુંજાવે એ જ અંતરની અભિલાષા.

લબ્ધિશિશુ

તા. ૧૮-૬-૧૯૭૬ શાંતિનગર, અમદાવાદ-૧૩

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# युगादिवन्दना

युगादि पुरुषेन्द्राय युगादि स्थिति हेतवे ।
युगादि शुद्ध धर्माय युगादि मुनये नमः ॥१॥

श्रीमद् युगादीश्वरमात्मरूपं योगीन्द्र गम्यं विमलाद्रिसंस्थं ।
सद्ज्ञान सद्दृष्टि सुदृष्टि लोकं श्री नाभिसूनुं प्रणमामि नित्यं ॥२॥

राजादनाऽधस्तन भूमिभागे युगादि देवांघ्रिसरोजपीठं ।
देवेन्द्रवन्द्यं सुरराजपूज्यं सिद्धाचलाग्रस्थितमर्चयामि ॥३॥

दर्शयन् वर्त्म वीराणां, सुरासर नमस्कृतः ।
नीतित्रयस्य कर्ता यो युगादि प्रथमो जिनः ॥४॥

युगस्यादौ त्वयासेन ? ज्ञानत्रय युतेन ।
जनन्या मरुदेवायाः पावनं जठरं कृतम् ॥५॥

सेन्द्रश्रेणिनतः श्रीमान् नन्दतान्नाभिनन्दनः ।
उद्धार युगादौयो जगदज्ञानपङ्कतः ॥ (उपजाति) ॥६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# अनुक्रम


| | | |
|---|---|---|
| विभाग १ ...चैत्यवन्दनानि | ... पृष्ठ | १–१८ |
| विभाग २ ...स्तुतयः | ... ,, | १९–३० |
| विभाग ३ ...स्तवनानि | ... ,, | ३१–१३७ |
| स्तोत्रानि | ... ,, | १३८–१३९ |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परम पूज्य चारित्रचूडामणि आचार्यदेव

## कैलाससागर सूरीश्वरजी महाराज साहेब



विख्यातः शब्दशास्त्रे बुधजनमहितोज्ञानदानेऽविषण्णः ।
स्याद्वादे शास्त्र तत्त्वे विशद पटुमतिः तीक्ष्णव्याख्या प्रवीणः ॥
व्याख्याने ख्यातकीर्तिः समकित-सुखदां देशनाया सुवासात् ।
कैलासाब्धिर्मुनींद्रः स्वपर सनयवित्सच्चरित्रो जयेद्धि ॥१॥

★ ★

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रवर ज्ञानरमोदय धारकम्,
जगदनी हित दुःखविदारकम् ।
शुचि गुणैर्जगदुज्ज्वल कारकम्,
वितथ कार्य विकाश विनाशकम् ॥२॥

नत सुरासुर राज समाजकम्,
सकल सद्गत भाव विनाशकम् ।
हृदयमाथक मन्मथमाथकम्,
नमत नाथमनाथ सनाथकम् ॥३॥

४

[वसन्ततिलका वृत्तम्]

श्री नाभिराज कुलनन्दन कल्पवृक्षः,
सम्प्राप्त सर्व सुर पूज्य तमत्व पक्षः ।
उल्लासयन् रविरिवाङ्गि सराज खण्डः,
दिश्यात्सशर्म वृषभो भवतामखण्डम् ॥१॥

त्रैलोक्यलोक चल नेत्र चकोर चन्द्रम्,
वैराग्य रङ्ग रस भङ्ग भयास्ततन्द्रम् ।
संसार सिन्धु तरणाय सुयानपात्रम्,
देवं नमामि वृषभं प्रपवित्र गात्रम् ॥२॥

येन प्रदर्शित मशेष कला कलापम्,
दुर्बोध जात दुरितौघ कृताऽपलापम् ।
स्मृत्वाऽधुनाऽपि जनता निज कार्य जन्म,
दुर्द्धर्षिणीति हरणोस्तु स नाभिजन्मा ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५

[ पञ्चचामर वृत्तम् ]

पुरोग कान्ति केतनं, सुशान्ति सद्भने घनम्,
सुपुण्य शाखि जीवनं, समस्त जीव पावनम् ।
कुपक्ष कक्ष पावनं, कुरोष वह्नि कुम्भिनम्,
जिनौघ कल्प नन्दनं, ननामिनाभिनन्दनम् ॥१॥

अनन्त सत्त्वस्विनं, युगादिमं तपस्विनम्,
पुरोग भद्र केतनं, कुराग दन्ति केतनम् ।
सुमुक्ति रत्न केतनं, प्रमोद सौध केतनम्,
जिनौघ कल्प नन्दनं, नमामि नाभिनन्दनम् ॥२॥

तमः कघौ जलेन्धनं, स्मरद्रुमे नगादनम्,
समग्र सग्विनाशनं, भवज्वरे रसायनम् ।
गतामयं सनातनं, सुखालयं सुदर्शनम्,
जिनौघ कल्प नन्दनं, नमामि नाभिनन्दनम् ॥३॥

६ *

[ स्रग्धरावृत्तम् ]

श्रीमन्नाभेःक्षितीन्द्रा, दधिगतजननः, सद्विनीता नगर्याम्,
मातुः स्वप्नानुसाराद्, वृषभइति परान्वर्थ नामा प्रधामा ।
योऽभूत्तीर्थंकराऽऽद्य, स्त्रिभुवन जनता, बोधि बीज प्रदाता,
सोऽयं पायादपायाद निशमिह विभुर्नः प्रयन्नार्ति हर्ता ॥१॥

* विजय यतीन्द्र सूरि प्रणीतम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भार्जं भार्जं यदीयं, क्रम जलजयुगं, मुक्तिमन्तः क्रियन्तः,
श्रद्धावन्तो महान्तः शिवसुखमतुलं, लब्धवन्तो जगत्याम् ।
यातारो यान्ति चाग्रे, तन जन कृपया, शाश्वतं धर्म मेनम्,
प्रायुश्चक्रे दयालुः, सहि भवतु सदा, शर्मकृन्नाभिसूनुः ॥२॥

यत्सेवा भक्तिभाजां, जनति जुनिजुषां, कल्पवल्लीव नित्यम्,
भुक्तिं मुक्ति प्रदत्तो, श्रियमपिपरमां, निश्चलांतन्तनीति ।
मुक्ताहाराऽवभासं, त्रिभुवनमहितं यद्यशो वर्वृधीति,
नाभेयं तं सुवन्दे, शिवपद जनकं, श्री यतीन्द्रोऽति भक्त्या ॥३॥

७

[ अनुष्टुप वृत्तम् ]

अनन्त सिद्ध सौधाय, परमाणन्द कारिणे ।
कल्याण वृक्ष कन्दाय, दुर्गति क्लेश दारिणे ॥१॥
पापानामपि शन्दाय, संसारावृर्त्ति–हराय च ।
नाभि नन्दन दीप्ताय, तस्मै तीर्थाय मे नमः ॥२॥
कर्म शत्रु विजेतारम्, देवासुरैः सुसेवितम् ।
शत्रुञ्जयं महातीर्थं, प्रध्यायामि सुभक्तितः ॥३॥

८

कञ्चनशैल शिखा मुकुटं तं, नाभि तनूज मनुत्तम रूपम् ।
आदि जिनेशमहं सुरपूज्यम्, स्तौमि मुदा गुणरत्नवचोभिः ॥१॥
यत्रपदार्पणतः शुभभावो, ऽनन्तगुणः समुदेतिजनस्य ।
मुक्तिमनन्त जनाश्च यतोऽगुः, तं गिरिराज महं प्रणमामि ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तीर्थंकर प्रतिमा गुण कान्ता, यत्र निरीक्ष्य महा गुण भाजः ।
हर्षभराः प्रणता भवि लोकाः, तं गिरिराज महं प्रणमामि ॥३॥
सायककोटिमितैर्मुनिवर्यैं, रादिगणीप्रविधायचयत्र ।
मुक्ति मगादुपवास तपस्यां, तं गिरिराज महं प्रणमामि ॥४॥

९

[ अनुष्टुप वृत्तम् ]

कल्लाण केलि निलयं, निन्नासे कम्म संघायं ।
सव्व तित्थाण नाहंच पुंडरीयं गिरिं वन्दे ॥१॥
देविंद वंदियं सिट्ठं, दायगं सिवसंपयं ।
मिच्छत्तणासगं धीरं, पुंडरीयं गिरिं वन्दे ॥२॥
हणणं मय अट्ठणहं, सज्झाणमालंबणं ।
निम्मल दंसण गेहं, पुंडरीयं गिरिं वन्दे ॥३॥
दुक्खसंतत्तज्जंतूण, माधारं नगाहि वइं ।
सिद्धिदं गम्बुहंसं च, युगाइमं सया वन्दे ॥४॥
परमाणंद संदोह, मुसभं नाभिनन्दणं ।
जइंद पुज्जकित्तियं, वंदामि सासयं तित्थं ॥५॥

१०

[ अनुष्टुप वृत्तम् ]

जयत्यादिम तीर्थेशः, त्रिलोकी मङ्गलद्रुमः ।
श्रेयः फलं सदा लोका, यदा लोकादुपासते ॥१॥
श्रीमन्नाभिकुलादित्य, मरुदेव्यङ्गज ! प्रभो !
संसाराब्धि महापोत ! जय त्वं वृषभध्वजः ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमस्ते जगदानन्द, मोक्षमार्गविधायक ।
जैनेन्द्र विदिताशेष भावस्तद् भावनायक ! ॥३॥

प्रक्षीणाशेष संस्कार, विस्तार परमेश्वर ! ।
नमस्ते वाक्कथातीत ! त्रिलोकनरशेखर ! ॥४॥

भवाब्धि पतितानन्त, सत्व संसार तारक ।
घोर संसार कान्तार, सार्थवाह ! नमोस्तुते ॥५॥

११

[ अनुष्टुप वृत्तम् ]

आदिनाथ जगन्नाथ, विमलाचल मंडन ।
जय नाभिकुलाकाश, विकासन दिवाकर ! ॥१॥

तव देव पदाम्भोज, सेवाऽपि दुर्लभा भवेत् ।
पुण्य सम्भार हीनानां, कल्पवल्लीव देहिनाम् ॥२॥

ते धन्या मानवा देवा, येऽगमन् तव शासनम् ।
वन्दनीया विभाते ते, वन्दन्ते भवतः पदौ ॥३॥

प्रचण्ड भवरागादि, रिपु सन्तति घातकम् ।
श्री युगादि जिनाधीशं, देवं वन्दे मुदा सदा ॥४॥

श्री शत्रुञ्जय कोटीर कृतं राज्यश्रिया विभो ।
दुर्बोध नाशनं मेऽस्तु, शासनं ते भवे भवे ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१२

[ वसन्ततिलका वृत्तम् ]

कर्मौघ वारण विदारण हीरणारिम्,
भव्यारविन्द गण बोधन तिग्म रश्मिं ।
संसार भीतिकर सागरयानपात्रम्,
वन्दे हि नाभिजमहं बिमलाचलस्थम् ॥१॥

क्रोधानिलाशन विनाशन वैनतेयम्,
माला चलाधर विभेदन वर्य शम्बम् ।
माया लता व्रज विकर्तन मत्तनागम्,
वन्दे हि नाभि जमहं विमलाचलस्थम् ॥२॥

लोभाऽशुशुक्षणिन मीलन मेघपुष्पम्,
रागोत्कटेन्धनमयं लवितुं कुठारम् ।
द्वेषासितोदकद नाशन चण्डवातम्,
वन्दे हि नाभिजमहं विमलाचलस्थम् ॥३॥

मोहान्धकार पटलात्यय चित्र भानुम्,
अज्ञान वारण खुसावन सामयोनिं ।
चारित्र नीर जनकाकर पङ्कजन्मम्,
वन्दे हि नाभिजमहं विमलाचलस्थम् ॥४॥

कारुण्यता प्रततिमण्डल सारणीं च,
सत्योत्तमामर वनाग्रिय पारिजातम् ।
अष्टादशा श्रवमतङ्गज पञ्चवक्त्रम्,
वन्दे हि नाभिजमहं विमलाचलस्थम् ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१३ +

[ भुजङ्ग प्रयातम् ]

चिदानन्दलीला रसास्वादलीनं, गुणैः सिद्धिभाजामनन्तैरहीनम् ।
मुदा सर्वदा युगादीशदेवं, स्तुवेभद्रदायि क्रमाम्भोज सेवम् ॥१॥

गृहस्थे बभाषे कलाशिल्प शास्त्रं, क्रमात्केवली यश्चधर्मप्रकारम् ।
स एव प्रभुः सर्वलोकोपकारी, न चान्यस्ततो ज्ञान नैर्मल्य धारी ॥२॥

महाशुद्ध सिद्धान्त मध्ये प्रसिद्धं, प्रतीतं पुराणेषु शोभा समृद्धम् ।
गतं वेद वेदान्त शास्त्रेऽवदातं यदीयं चरित्रं नच क्वापि भातम् ॥३॥

अनन्तं पुनन्तं जनं भक्तिमन्तं, हरन्तं दुरन्तं प्रमादं स्फुरन्तम् ।
जिनं नाभि भूपाल वंशावसन्तं, श्रये तं शरण्यं शिवाम्भोजहंसम् ॥४॥

कलाकेलि सर्वप्रणाशे सुपर्णः सुवर्णोपमानोल्लसद्देहवर्णः ।
वृषाङ्कः सुखाङ्कुर मेघः सुरम्यं, युगादीश्वरो मे प्रदत्तां सुसाम्यम् ॥५॥

१४ ×

[ द्रुतविलम्बितम् ]

ऋषभदेव जिनेश कृपानिधे,! प्रथम तीर्थ पते गुण वारिधे।
प्रणतपाल! शुभङ्कर! सद्विधे! कुरु कृपामधुना महिमोदधे! ॥१॥

+ श्री शीलरत्न सूरि प्रणीतम्

× श्री यतीन्द्र सूरि प्रणीतम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भविक तारक ! बारक संसृते ! दुरित राशि निवारक ! सत्पते ।
सुमति दायक ! नायक ! भूपते !, कुरुदयामति दीनगुणोज्झिते ! ॥२॥

सकल दुःख मुज्झित सिद्धितः, प्रचुर कष्ट सहादनु तापतः ।
भव कदम्ब महोदधि पातत, स्तरण तारण तारय मामितः ॥३॥

प्रथित विश्व जनीन !, जगद्धित, प्रणय देव ! नरासुर पूजित ! ।
क्रम युगाम्बुज भावन योगतः प्रथम केवल भाजन मामितः ॥४॥

जगतशेष विभूति विभूषितं, हरजीपत्तह चैत्य विराजितम् ।
मुनियतीन्द्र कृत स्तुति तोषितं, विभुममुं नमताऽतुल मूर्जितम् ॥५॥

१५

[ अनुष्टुप वृत्तम् ]

तुभ्यं नमस्तीर्थ नाथ !, सनाथी कृत विष्टप !
कृपा रस सरिन्नाथ नाथ श्री नाभि नन्दन ॥१॥

मत्यादिभिस्त्रिभिर्ज्ञानैः सहोत्थै र्नाथ ! शोभसे ।
नन्दनाभिसद्यानैः, रवि मेरू महीधरः ॥२॥

देवेदं भारतं वर्षं, दिवोऽप्यद्याति रिच्यते ।
त्रैलोक्य मौलि रत्नेन, यदलं क्रियते त्वया ॥३॥

असौ त्वज्जन्मकल्याण, महोत्सव पवित्रितः ।
आ संसारं जगन्नाथ ! वन्ध्यस्त्वमिव वासरः ॥४॥

नारकाणामपि सुखं, जज्ञे त्वज्जन्म पर्वणा ।
अर्हतामुदयः केषां, नस्यात्संताप हारकः ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जम्बूद्वीपस्य भरतः, क्षेत्रनष्टो विधानवत् ।
त्वदाज्ञा बीज केनाऽतः परं धर्मः प्रकाशताम् ॥६॥

त्वत्पादौ प्राप्य संसारं, तरिष्यन्ति न के ऽधुना ।
अयोऽपि यानपात्रस्थं, पारं प्राप्नोति वारिधेः ॥७॥

कल्पवृक्ष इवा वृक्षे, नदीस्त्रोतो मरामिव ।
भगवन्नवतीर्णोऽसि, लोक-पुण्येन भारते ॥८॥

१६

[ उपजाति वृत्तम् ]

सिद्धा अनेके मुनयो धरेशे,
नाशं च कृत्वा निज कर्म चम्वः ।
निवार्य सम्यग् जनि जीर्ण मृत्यून्,
जिनेश्वराणामभिधानिनत्वा ॥१॥

आदेर्जिनस्यादिगणेश्वरश्च,
सिताम्बुजाख्यः शरकोटी भिश्च ।
सिद्धाचले चैत्रिक नाम्नि मासे,
गतश्च मोक्षं वरपूर्णिमायाम् ॥२॥

[ वसन्ततिलका वृत्तम् ]

पूर्वार्हतः करणज-द्रविडस्य पुत्रौ,
श्री द्राविडोऽग्र इतरः किल वारिखिल्लः ।
दिक्कोटिभिः परि करेण गतौ शिवं तौ,
मासे पुरोग बहुलेऽहनि पूर्णिमायाम् ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ उपजाति वृत्तम् ]

सिद्धिं गतः श्री नमिरभ्रचारी,
सहोदरस्तस्य विनम्यभिख्यः ।
कोटी द्वयेन यतिना च सार्धम्,
तपस्य शुक्लेच तिथौ दशम्याम् ॥४॥

[ इन्द्रवजा वृत्तम् ]

लक्षैक युक्तेन मुमुक्षुभिश्च,
सिद्धिं गतः सूर्ययशाधरापः ।
वैश्वानरग्लौ मित कोटि भिश्च,
सिद्धाचले सोमयशा महीशः ॥५॥

सेलङ्ककः पञ्चशतेन सार्धम्,
त्रिकोटिभिर्भूप जयाभिधानः ।
सिद्धिं गतो बाहुबलो मुनीन्द्रः,
समं सहस्त्रेण गजाधिकेन ॥६॥

महेन्द्रराट् पञ्चशतेन सार्धम्,
सुभद्रकः पञ्चशतेन साकम् ।
समं सहस्त्रै र्भुवन प्रमैश्च,
मुमुक्षुभिर्वै दमितारि साधुः ॥७॥

[ वसन्ततिलका वृत्तम् ]

श्री शान्तिना जिनवरेण यदा च चातु,—
र्मास्यं कृतं श्रमणकैश्च समं सुखेन ।
वाचंयमा खलु तदा गृहिणश्च सर्वे,
मोक्षं गताः स्थिर हृदो विधु सप्तकोट्यः ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ उपजाति वृत्तम् ]

श्री कण्डुसाधुः सममेक कोट्या,
शुभाणगारः शत सप्तकेन ।
कोट्या समं सागर संज्ञकश्च,
शिलोच्चयेशे प्रगताश्च मोक्षम् ॥९॥

कर्माणि भित्त्वा ऽजित सेन साधुः,
शिवं गतः संयम कोटिभिश्च ।
सत्रायुतेना ऽजितनाथ साधुः,
सुवासरे चैत्रिक पौर्णमास्याम् ॥१०॥

सार्धाष्ट कोटिं मित साधु वर्यैः,
शरीरभूजाम्बुवतीतनूजौ ।
वासे वरे फाल्गुनिके वलक्षे,
स्मरे तिथौ मोक्ष पदं गतौ च ॥११॥

कदम्बसाधुःसममेककोट्या,
सुकालिकः पञ्चसहस्रमानैः ।
श्री रामचन्द्रः शरकोटिभिश्च,
सिद्धाचले मोक्ष पदं प्रजग्मुः ॥१२॥

[ वसन्ततिलका वृतम् ]

ते पाण्डवाश्च सह विंशति कोटिभिश्च,
मोक्षं गताः सुमुनिभिश्च जितेन्द्रियाश्च ।
कर्मेन्धनानि सकलानि च नाशयित्वा,
सिद्धाचले च सदिषेऽहनि पूर्णिमायाम् ॥१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ इन्द्रवज्रा वृत्तम् ]

साकं सहस्रेण परिग्रहेण,
संन्यासिको वै शुक संज्ञकश्च ।
श्री सार साधुः सममेक कोट्या,
मोक्षं गतौ श्रेष्ठ धरा धरेशे ॥१४॥

[ वसन्ततिलका वृत्तम् ]

इत्यादयो मुनिवराः सुशिवं गताश्च,
छित्वाच किण्व गहनं तपसायुधेन ।
शूकेन युक्त हृदया गतसर्व विघ्नाः
सिद्धिंगता विमलथे वर तीर्थ मीडे ॥१५॥

× मुनिप्रवर श्री मुक्तिविमल प्रणीतम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१७

[ स्रग्धरावृत्तम् ]

अर्हन् श्रीआदिनाथः प्रथमजिनवरो देवराजः प्रपूज्यः,
ध्येयस्तीर्थाधिपो यो वरमतिविभवै धारितोऽनेकभेदैः ।
कर्ता हर्ता च धर्ता सकलविधिमयः सोऽर्बुदे शैलनाथे,
सम्यक् चैत्ये जिनेन्द्रो हरतु हरतु नो व्यापदां वः समूहम् ॥१॥
सर्वज्ञो वीतरागो विगतकलिमलो बुद्धबोधो विजेता,
निर्नाशो नित्यवासी सकलमतिवरः सिद्धसंख्यस्तु ध्येयः (चिंत्यः) ।
विश्वे रत्नेति रामो विविधगतिकरो देवतानां च स्वामी (नाथः),
सम्यक् चैत्ये जिनेन्द्रो हरतु हरतु नो व्यापदां वः समूहम् ॥२॥
'कामो वेच्छार्थदाते 'ति सुमतिकलिता अन्यलोकाः स्तुवन्ति,
लक्षै र्लक्ष्यो न यः सम्यगिति च विमता नास्तिका नास्ति किंचित् ।
शैवाः शैवं च नाथं भज भज भज भोः ! सूरिराजेन्द्रम् एतम्,
सम्यक् चैत्ये जिनेन्द्रो हरतु हरतु नो व्यापदां वः समूहम् ॥३॥

१८

[ उपजातिवृत्तम् ]

श्रीआदिनाथं नतनाकिनाथम्,
लक्ष्म्या सनाथं कृतपापमाथम् ।
संवेगताम्यत्क्तहेमहीरम्,
संसारदावानलदाहनीरम् ॥१॥
निर्वाणयोषिद्घनबद्धरागं,
सश्रीकभालं, गदशाखिनागम् ।
संस्तौमि सुत्रासितकर्मवीरम्,
सम्मोहधूलीहरणे समीरम् ॥२॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशारदोद्गीतगुणप्रताना,
मीडे वृषाङ्कं विगताऽभिमानम् ।
सद्ब्रह्मशस्त्राऽपहताऽशरीरम् ,
मायारसादारणसारसीरम् ॥३॥

कल्याणकन्दोदयकन्दकल्पम् ,
सद्वाञ्छितार्थैकविधानकल्पम् ।
आदिप्रभुं पुण्यशमाम्रकीरम् ,
नमामि वीरं गिरिसारधीरम् ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विभागः २

★

# स्तुतयः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्री ऋषभजिनेन्द्र स्तुतिः— ×

१

[ शार्दूलविक्रीडितम् ]

भव्याम्भोजविबोधनैकतरणे विस्तारिकर्मावली,
रम्भासामज ! नाभिनन्दन ! महानष्टापदाभासुरैः ।
भक्त्या वन्दितपादपद्म ! विदुषां, सम्पादय प्रोज्झिता,
रम्भासाम ! जनाभिनन्दन ! महानष्टापदाभासुरैः ॥१॥

ते वः पान्तु जिनोत्तमाः क्षतरुजो नाचिक्षिपुर्यन्मनो,
दाराविभ्रमरोचिताः सुमनसो, मन्दारवा राजिताः ।
यत्पादौ च सुरोज्झिता सुरभयाञ्चक्रुः पतन्त्योम्बरा,
दाराविभ्रमरोचिताः सुमनसो मन्दारवाराजिताः ॥२॥

शान्ति वस्तनुतान्मिथोऽनुगमनाद् यन्नैगमाद्यै नयै-
रक्षोभं जन ! हेऽतुलांछितमदोदीर्णाङ्गजालं कृतम् ।
तत्पूज्यैर्जगतां जिनैः प्रवचनं, दृप्यत्कुवाद्यावली,
रक्षोभञ्जनहेतुलाञ्छितमदो दीर्णाङ्गजालंकृतम् ॥३॥

शीतांशुत्विषि यत्रनित्यमदधद् गन्धाढ्यधूलीकणा,
नालीकेसरलाऽलसा समुदिताऽशु भ्रामरीभासिता ।
पायाद्वः श्रुतदेवता निदधती तत्राब्जकान्ती क्रमौ,
नालीके सरलाऽऽलसा समुदिता शुभ्रामरीभासिता ॥४॥

---

× श्रीशोभनमुनिवरप्रणीता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२ *

[ वसन्ततिलकावृत्तम् ]

श्रीसूरिहर्षविनयप्रभुता प्रतिष्ठा,
श्रीसूरिहर्षविनयस्मरणीयरूपः ।
श्रीसूरिहर्षविनयऽध्वनि रत्नराशौ,
श्रीसूरिहर्षविनयःप्रथमः श्रियेऽर्हन् ॥१॥

पूज्याः सहर्षविनयस्तुतपादपद्माः,
तीर्थस्य हर्षविनयश्रियम् आदधानाः ।
सर्वत्र हर्षविनयस्वनसन्निधाना,
यच्छन्तु हर्षविनयप्रसृतं जिनास्ते ॥२॥

सूरीशहर्षविनय द्विपदर्पयायी,
सूरीशहर्षविनयस्थितिकेसरश्रीः ।
सूरीशहर्षविनयप्रियकक्षशाली,
श्रीः आगमो हरिः इवोत्तम धर्महंसः ॥३॥

श्रीधर्महंसललने नलिनीसधर्म-
श्रीधर्महंसनमना कमला श्रुतेशा ।
पद्मा श्रियेऽस्तु भविनां गुरुधर्महंस,
श्रीधर्महंससुमहा विजया जयाम्बा ॥४॥

३ ×

[ वसन्ततिलकावृत्तम् ]

नम्रेन्द्रमौलिगलितोत्तमपारिजात-
मालार्चितक्रम ! भवन्तम् अपारिजात ! ।
नाभेय ! नौमि भुवनत्रिकपापवर्ग-
दायिन् ! जिनास्तमदनादिकपापवर्ग ! ॥१॥

---

* पंडित श्रीधर्महंसप्रणीता.

× श्रीबप्पभट्टिसूरिप्रणीता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दारिद्र्यं अद्रिसमविग्रहतापनीय,
राशिप्रदानविधिना महताऽपनीय ।
यैर्दुःखशत्रुः इह जन्मवताम् अघानि,
विघ्नन्तु ते जिनवरा भवताम् अघानि ॥२॥

यद् दोषदारुदहनेषु रतः कृशानुः,
स्यादापदुर्व्येपि हि यत् स्मरतः कृशा नुः ।
यद् वृष्टिरेव परिदाहिषु मेघजाऽलं,
जैनं मतं हरतु तद् गुरु मेऽघजालम् ॥३॥

यां द्राग् भवन्ति सुरमन्त्रिसमा नमन्तः,
संत्यज्य मोहं अधियोऽप्यसमानं अन्तः ।
वाग्देवता हतकुवादिकुला भवर्णात्,
सा पातु कुन्दविकसन्मुकुलाभवर्णा ॥४॥

४ ×

[ वसन्ततिलकावृत्तम् ]

सर्वाङ्गिवारिजदिवाकर ! कर्मनाशिन् !
श्रीनाभिनन्दन ! सुरासुरवन्दितांह्रे !
सर्वाऽसुमत्सुखकर ! प्रथमानकीर्ते !,
ह्रेऽज्ञानवारिधिगतं परिपाहि विश्वम् ॥१॥

देवोज्झिता सुमततिर्गगनात् पतन्ती,
यत्पादयुग्म अमलं समलञ्चकार ।
ते पान्तु शान्तमनसो विमला जिनेन्द्राः,
सिद्धिस्थिता भवभयाद् भवतो विभान्तु ॥२॥

× श्रीरङ्गविमलप्रणीता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नायद्वयच्छदयुतो ह्यभङ्गपुष्पी,
सत्तत्वसौम्यफलसम्पद् अशेषवन्द्यः ।
निःशेषगात्रिसुदयोत्तममूलपुष्टिः,
भूयादिहाऽऽगमतरु र्जनुषां हिताय ॥३॥

वन्द्याऽऽद्यपूज्यजिनपादसरोजभृङ्गी,
मार्णालनालविलसन्मृदुवाहचङ्गी ।
चक्रेश्वरी जननीः अवतादभङ्गी,
श्रीमुक्ति रङ्गमुनि भद्रकरी तथाऽस्तु ॥४॥

५

[ मालिनीवृत्तम् ]

दिश सुखम् अखिलं नः, सीरसाधारणस्त्वम्,
वृषभ ! रतरसायाम् ईश ! मानं दधानः ।
सुरनरनिकरेण स्तूयसे यः सदोद्यद्,
वृषभर तरसायाम् ईश ! माऽऽनंदधानः ॥१॥

सुजनजिनवराणां, स्तोमम् अस्त स्मराणाम्,
व्रज मघवलयानां, तं त्रपात्रं पराणाम् ।
पवन इव पयोदं, योऽनयन्नाशमाशु,
व्रजमघवलयानां, तन्त्रपात्रं पराणाम् ॥२॥

उचितमिह भवन्तं, सर्ववित्सार्वभौमाऽऽ-
गम तनु महतां मे, ध्यानम् अस्तारभावम् ।
निखिलसुखनिदानं, कामितार्थैकदेवाऽऽ
गमतनु महतां मेध्यानम् अस्तारभावम् ॥३॥

त्रिदशततिनता श्रीधाम चक्रेश्वरी सा,
जयति मुदितहृद्, याताऽपमानाऽसमाना ।
प्रणमति नरराजि, यां स्तुतध्वस्तदम्भाऽ
जयतिमुदित हृद्याऽतापमाना समाना ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



६

[ वसन्ततिलकावृत्तम् ]

आनन्दमन्दिरमुपैमि तमृद्धिविश्व,
नाभेय ! देवमहितं सकलाभवन्तम् ।
लब्ध्वा जयन्ति यतयो भवयोधम् आदौ,
नाभेयदेवमहितं सकला भवन्तम् ॥१॥

तं तीर्थराजनिकरं स्मर मर्त्य ! मुक्तं,
पद्मेक्षणं सुमनसां प्रमदा दरेण ।
वृष्टिं व्यधुर्विविधवर्णजुषां यदंह्रि,
पद्मेऽक्षणं सुमनसां प्रमदादरेण ॥२॥

चित्ते जिनप्रवचनं चतुराः कुरुध्वम्,
सिद्धेतुलाञ्छितमदो दितसाङ्गजालम् ।
यत्प्राणिनाम् अकथयद् वरवित्तिलक्ष्मीं,
सिद्धेऽतुलां छितमदोदितसाङ्गजालम् ॥३॥

सा मे चिनोतु सुचिरं चलचञ्चुनेत्रा,
चक्रेश्वरी मतिमतान्तिमिरंमदाभा ।
या हन्ति हेलि रुचिवद् विलसन्नितम्ब,
चक्रेश्वरी मतिमतां तिमिरं मदाभा ॥४॥

७

] वसन्ततिलकावृत्तम् ]

भक्तामरप्रणतमौलिमणिप्रभाणा,
मुद्दीपकं जिनपदाम्बुजयामलं ते ।
स्तोष्ये मुदाऽहमनिशं किल मारुदेव !
दुष्टाष्टकर्मरिपुमण्डलभित्सुधीर ! ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमज्जिनेश्वरकलापम् अहं स्तुवेऽर-,
मुद्योतकंदलितपापतमोवितानम् ।
भव्याम्बुजातदिननाथनिभं ! स्तवीमि,
भक्त्या नमस्कृतम् अमर्त्यनराधिराजैः ॥२॥
वर्या जिनक्षितिपते त्रिपदीम् अवाप्य,
गच्छेश्वरैः प्रकटिता किल वाग्मुदा या ।
सम्यक् प्रणम्य जिनपादयुगं युगाद्या,
वेवं शुभार्थनिकरैं भुवि साऽस्तु लक्ष्म्यै ॥३॥
यक्षेश्वरस्तव जिनेश्वर ! गोमुखाऽह्वः,
सेवां व्यधत्त कुशलक्षितिभृतपयोदः ।
त्वत्पादपङ्कजमधुव्रततांदधानो-
वालम्बनं भवजले पततां जनानाम् ॥४॥

८

[ शार्दूलविक्रीडितम् ]

संसारार्णवतारक ! क्षतमहा–कर्मावलीवेदन, !
सद्भक्त्या प्रणतांघ्रिपद्मयुगल ! श्रेयस्ततिं साधय ।
श्रीमन्नाभिनरेन्द्रनन्दन ! जनाऽनन्दप्रदानोत्तम !
भक्तानाम् अभयप्रद श्रुतवतां, सर्वापदां वारक ! ॥१॥
सर्वे पान्तु जिनोत्तभा वररुचः, सद्धर्मविस्तारिणो,
ध्वस्ताऽज्ञानतमोभरा जनगणा, निर्मानमायालवाः ।
यत्पादाम्बुजयोर्लुठन्ति सततं, स्वर्गौकसः सादराः,
सिद्धानन्दपदप्रियाः कृतधियो मन्दारमालाञ्चिताः ॥२॥
भव्या ! वस्तनुतां सुशान्तिमनिशं, पूज्यैर्व्रतीन्द्रैः कृतम्,
दुर्लक्ष्यं दुर्वादिभिर्दलितदु, –र्मोहारिवर्गोद्यमम् ।
अक्षोभ्यं कुमतैर्जनैः प्रवचनं, तत्त्वार्थराशिश्रितम्,
निक्षेपाऽऽगमसिद्धतत्वविमलार्णोराशिमुद्द्योतकम् ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पायाद्वः श्रुतदेवताश्रितवती, शुक्लाम्बुजं निर्मलम्,
सम्यक्तत्त्वविलासरक्तहृदया, विस्तारिता नन्दका ।
यत्प्रेक्ष्याऽलसमानसा स्थितवती, सद् भ्रामरी सन्ततिः,
सन्त्यज्याऽऽश्रमिताऽमरद्रुमसुमं, सौरभ्यसंराजितम् ॥४॥

९

[ मालिनीवृत्तम् ]

जय वृषभजिनऽभिः, स्तूयसे निम्ननाभिः-
जडिमरविसनाभियैः सुपर्वाङ्गनाभि : ।
तम इह किल नाभि,-क्षोणिभृत्सूनुनाभि-
द्रुतभुवनम् अनाभि क्षान्तिसम्पत्कुनाभिः ॥१॥

विगलितवृजिनानां, नौमि राजीं जिनानाम्,
सरसिजनयनानाम्, पूर्णचन्द्राननानाम् ।
गजवरगमनानाम्, वारिवाहस्वनानाम्,
हतमदमदनानां, मुक्तजीवाऽऽसनानाम् ॥२॥

अविकलकलतारा,-प्राणनाथांशुतारा,
भवजलनिधितारा, सर्वदाऽविप्रतारा ।
सुरनरविनता रात्वाऽऽर्हती गीर्वताऽऽरा,
दनवरतमितारा, ज्ञानलक्ष्मी सुतारा ॥३॥

नयनजितकुरङ्गी, कांसुधारोचिरङ्गी-,
मिह किल मुहुरङ्गी; कृत्यचित्तान्तरङ्गी ।
स्मरति हि सुचिरंगी, दैवतां यस्तु तरङ्गी,
कुरुत इममरंगीत्यादिकृत्बन्धुरङ्गी ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१०

[ शार्दूलविक्रीडितम् ]

सम्यक्त्वाब्जविकासभास्कर ! विभो ! कर्मद्रुमोन्मूलने,
मत्तेभोरुपराक्रम ! द्युतिनिधे !, नाभेय ! मुक्तिप्रद ! ।
संसाराऽनलदह्यमानजनता, तापाऽपहे वारिद !
त्वन्नामस्मरणेन मंगलमहान्नूत्नान्सदावाप्नुमः ॥१॥

ते नो दद्युरनारतं जिनवराः, सत्संवरं निर्जराम्,
मुक्तिं चात्मशमप्रदां, जनिमृतिप्रध्वंसिकीं शाश्वतीम् ।
ये साध्यैकपरायणाः परहिता लोकैकपूज्यप्रभाः,
लोकाग्रैकपदस्थिता अपि जगद्व्याप्ता भवोत्तारकाः ॥२॥

ज्ञानं नेत्रमनुत्तमं नरभवे, प्राप्नोति यत्पूर्णताम्,
मिथ्यादिक्षयजातदर्शनयुता–च्चारित्रसंसर्गतः ।
नूनं तज्जिनशासने मतिमतां पुण्योदयात्प्राणिनाम्,
लोकालोकसमस्तवस्तुविषयं, प्रोज्जृम्भते सिद्धिदम् ॥३॥

श्रीनाभेयपदाब्जसेवनपरा, चक्रेश्वरी देवता,
विख्याता जिनशासने भयहराऽधिष्ठायिकाऽऽनन्ददा ।
चञ्चद्दिव्यविभाप्रकाशकतनू–श्चक्रं वहन्ती करे,
दैत्यव्रातबलप्रभञ्जनचणा, जीयाज्जगत्यां सदा ॥४॥

११ ×

[ शार्दूलविक्रीडितम् ]

नित्यानन्दमयं स्तुवे तमनघं, श्रीनाभिसूनुं जिनम्,
विश्वेशं कलयामलं परमहं, मोदात्तं अस्तापदम् ।
नित्यं सुन्दरभावभावितधियो, ध्यायन्ति यं योगिनो,
विश्वेऽशंकलयामलं परमहं, मोदात् तमस्तापदम् ॥१॥

× पण्डित श्रीसुन्दरगणिप्रणीत।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ते यच्छन्तु जिनेश्वराः शिवसुखं, त्रैलोक्यवन्द्यक्रमाः,
ये भव्यक्रमहारिणोऽसमयशोभावर्द्धनाः कामदाः ।
तन्वानानवमङ्गलान्यनवमाः, श्रीसंघलोके सदा,
ये भव्यक्रमहारिणोऽसमयशोभा वर्द्धनाः कामदाः ॥२॥

श्रीसार्वप्रभवा भवस्य विभवद्भावारिभेदे भृशम्,
गीर्वाणप्रखराऽसतां प्रतनुता मत्यन्त कोमा सुहृत् ।
पापव्यापहरा धुताऽधिनिकरा, सन्द्धीकराऽमोदिता-
द्गीर्वाण प्रखरा सतां प्रतनुता,-मत्यन्तकाऽमासुहृत् ॥३॥

देयाच्छं श्रुतदेवता भगवती, सा हंसयानासना,
नालीकालयशालिनी तिकलितापाऽयाऽपहारक्षमा ।
धत्ते पुस्तकमुत्तमं निजकरे, या गौरदेहासदा,
नाऽली कालयशालि नीति,-कलिताऽपायापहारक्षमा ॥४॥

१२ ×

[ शार्दूलविक्रीडितम् ]

ऐन्द्रव्रातनतो यथार्थवचनः, प्रध्वस्तदोषो जगत्,
सद्यो गीत महोदयःशमवतां, राज्याऽधिकाराजितः ।
आद्यस्तीर्थकृतां करोत्विह गुणश्रेणीर्दधन्नाभिभूः,
सद्योगीतमहोदयःशम्-अवतां राज्याऽधिका राजितः ॥१॥

उद्भूताप्रतिरोधबोधकलितत्रैलोक्यभावव्रजा-
स्तीर्थे शस्तरसा महोदयभयाऽकान्ताः सदा शापदम् ।
पुष्णन्तु स्मरनिर्जयप्रसृमरप्रौढप्रतापप्रथा-,
स्तीर्थेशस्तरसा महोदयभयाः कान्ताः सदाशापदम् ॥२॥

× महोपाध्यायश्रीमद्यशोविजयजीप्रणीता.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जैनेन्द्रं स्मरतातिविस्तरनयं निर्माय मिथ्यादृशाम्,
संगत्यागमऽभङ्गमानसहितं हृद्यऽप्रभा विश्रुतम् ।
मिथ्यात्वं हरदूर्जितं शुचिकथं पूर्णं पदान्तं मिथः,
संगत्या गमभंगमानसहितं हृद्यऽप्रभावि श्रुतम् ॥३॥
या जाड्यं हरते स्मृताऽपि भगवत्यम्भोरुहे विस्फुरत्,
सौभाग्या श्रयतां हिता निदधती पुण्यप्रभाविक्रमौ ।
वाग्देवी वितनोतु वो जिनमतं प्रोल्लासयन्ती सदाऽ,—
सौ भाग्याश्रयतां हितानि दधती पुण्यप्रभावि क्रमौ ॥४॥

## प्राकृता १३

भावानयाऽणेगनरिंदविंदं, सव्विदसंपुज्जपयारविंदं ।
वंदे जसोनिज्जियचारुचंदं कल्लाणकंदं पढमं जिणिंदं ॥१॥
चित्तोगहारं रिउदप्पदारं, दुक्खग्गिवारं समसुक्खकारं ।
तित्थेसरा दिंतु सया निवारं, अपारसंसारसमुद्दपारं ॥२॥
अन्नाणसत्तुक्खलणे सुवप्पं, सन्नायसंहीलियकोहदप्पं ।
संसेमिसिद्धंतमहोअणप्पं, निव्वाणमग्गे वरजाणकप्पं ॥३॥
हंसाधिरूढा वरदाणधन्ना, वाएसिरी नाणगुणोववन्ना ।
निच्चंपि अम्हे हवउ प्पसन्ना, कुंदिंदुगोक्खीरतुसारवन्ना ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



માતુશ્રી જસુદબાઈ ભગવાનજી
પુત્રો : વોરા બાલાચંદ ભગવાનજી
વોરા નવલચંદ ભગવાનજી

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विभागः ३

★

# स्तवनानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीऋषभजिनेन्द्रस्तवनम्

१

[ त्रोटकवृत्तम् ]

जयदोदयसंयमधूर्धरणा, दिवयो वृषभाह्वयम आपपरम् ।
प्रथिताऽवितथव्यवहारपथं, प्रणयामि नतिं वृषभैकविभुम् ॥१॥
ऋषभ! प्रभुताद्भुतते-ह नया, तव क्वाऽपि चकास्ति यतः सततम् ।
मनसाऽपि विभावितभूतगुणः, स्वपदप्रद एव भवान्भविनाम् ॥२॥
वदनं वदनं सदनन्तपदं, प्रथितार्थगिरां नतदृक्पथगम् ।
भवभीतिभिदे तव भद्रभरोद्-भवनाय च सम्भवति प्रसभम् ॥३॥
तव मूर्तिरियर्त्ति नतार्त्तिशमाप्तं, चरणं करणं करणं शरणम् ।
समशिश्रियदाश्रमविश्रमणं, जिनपादयुगेऽकलयत्कमला ॥४॥
इति हर्षविनयसूरिस्तुतिनुत, पदपंकजः स्तु[त]त्वं मे ।
तव वृषभदेव! सेवां विरचये, गुरु-धर्महंस-रसाम् ॥५॥

२

[ वसन्ततिलकावृत्तम् ]

त्रैलोक्यलोककुलकल्पितकल्पनैक-
कल्पद्रुमं क्रयणमन्त्रिदशाधिनाथम् ।
भक्त्या भजध्वं अरिहं कु कुरङ्गनाथम्,
भो भो जना! ऋषभनाथम अनाथनाथम् ॥१॥
चञ्चच्चरित्रशुचिदर्शनसुप्रधान-
ज्ञानश्रियं वितरणे रणतादिनाथम् ।
आराधयध्व-मुरु-धैर्य-जितादिनाथम्,
भो भो जना! ऋषभनाथम् अनाथनाथम् ॥२॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौभाग्यभाग्यकमलाकमलायमाना-
निद्राननाऽऽकृतिनिरस्तनिशाधिनाथम् ।
स्वान्तैः स्मरध्वं अधिमारुतनामनाथम्,
भो भो जना ! ऋषभनाथम् अनाथनाथम् ॥३॥

विद्युत्प्रचण्डरुचिदण्डदवाग्निपिण्ड-,
जैत्रप्रतापभरभग्नदिव्राधिनाथम् ।
नित्यं नमध्वमुदयाब्धिजलाधिनाथम्,
भो भो जना ! ऋषभनाथम् अनाथनाथम् ॥४॥

श्रीऋषभनाथनामप्रभुः,
प्रभूतप्रभुत्वगुणधाम ।
इति मेदपाटमुकुटः,
स्तुतो जयतु कामकामकुटः ॥५॥

३

[ उपजातिवृत्तम् ]

पयोजपाणिं वृषभं वृषाङ्कं, रमातनूजन्मभिदावृषाङ्कम् ।
महोदयश्रीरजनीमृगाङ्कं, गुरुं स्तुवे कीर्तिनिरस्तराकम् ॥१॥

रुचिं दधानं परमाभिताकं, श्रीमङ्गलैस्त्वं समुपैति साकम् ।
हेलाप्रहीणं श्रितपुण्यपाकं, ररक्षयस्त्वां हृदि बुद्धलोकम् ॥२॥

विद्याऽनवद्यातमुपेत्य शोकं, जलेशयश्रीजितशाल्पशोकम् ।
यस्त्वां स्मरेत्पीडितकामघूकं, सूरप्रभं हर्षितसाधुकोकम् ॥३॥

रिपुव्रजाक्रान्तममुं वराकं, पुन्नाग पुन्नागनुतिष्वमूकम् ।
गंभीरसंसारजलैकभेकं, वाग्- वर्य ! नाभेय ! पुनीह्यशोकम् ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ मालिनीवृत्तम् ]

इति मुदितमनस्को, मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धै र्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावृद्धिनेयाणुरेणो,
स भवतु मयि देवो दत्तदृष्टिः सुतुष्टिः ॥५॥

४

[ अनुष्टुप्वृत्तम् ]

श्री नाभेय ! सुनाभेयसदनं, सदनन्तचित् ! ।
न त्वा नत्वा दयालो ! के लोके लोकेशतामगुः ॥१॥
हतमोह तमोहः, कामदः कामदर्पहा ।
जय सद्भाल ! सद्भाल त्वमितापद तापदः ॥२॥
स्तवं निर्माय निर्माय ! न तवाऽऽनतवासव ! ।
सुकृतीसु कृती जज्ञे, कोऽमलः कमलध्वने ! ॥३॥
नरमा नरमान-द्रु-प्रभञ्जन-प्रभञ्जन !
जनकाऽज ! नता लेभे, दर्पका ऽदर्पका त्वयि ॥४॥
यस्तवाऽभीमारि भीमारिप्रमद ! प्रमद-प्रद ! ।
नमतीन ! मती रेष सदयाः सदयाः श्रयेत् ॥५॥

५

[ उपेन्द्रवज्रावृत्तम् ]

स्वयम्भुवा भूतहितेन भूतले,
समञ्चसज्ञानविभूतिचक्षुषा ।
विराजितं येन विधुन्वता तमः,
क्षपाकरेणेव गुणोत्करैः करैः ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रजापति र्यः प्रथमं जिजीविषुः,
शशास कृष्यादिषु कर्मसु प्रजाः ।
प्रबुद्धतत्त्वः पुनरुद्भूतोदयो,
ममत्वतो निर्विविदे विदां वरः ॥२॥

विहाय यः सागरवारिवाससम्,
वधूमिवेमां वसुधां वधूं सतीम् ।
मुमुक्षु रिक्ष्वाकु-कुलादिरात्मवान्,
प्रभुः प्रवव्राज सहिष्णु-रच्युतः ॥३॥

स्वदोषमूलं स्वसमाधितेजसा,
निनाय यो निर्दय-भस्मसात् क्रियाम् ।
जगाद तत्त्वं जगतेऽर्थिनेऽञ्जसा,
बभूव च ब्रह्म-पदाऽमृतेश्वरः ॥४॥

स विश्वचक्षु-र्वृषभोऽर्चितः सताम्,
समग्रविद्यात्मवपु-र्निरञ्जनः ।
पुनातु चेतो मम नाभिनन्दनो,
जिनो जितक्षुल्लकवादिशासनः ॥५॥

६

[ अनुष्टुपवृत्तम् ]

अर्बुदाद्रौ युगादीशं, रिरीमूर्त्तियुतं स्तुमः ।
नेमिं च प्रतिमाः सर्वाः प्रासादत्रयसंश्रिताः ॥१॥
धन्योऽसौ विमलो मन्त्री, वस्तुपालोऽपि मन्त्रिराट् ।
यद्धर्मकीर्तने स्थाने, ईदृशे विषमे गिरौ ॥२॥
श्लाध्यौ नरोत्तमावेतौ ययोः पद्मा कलावपि ।
प्रासादप्रतिमाद्यथ, प्रशस्यव्ययम् आश्रयत् ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऋषभाद्याः जिनाः सर्वे, विरहं निजपादयोः ।
मम मा ददतामीशः, सेवके कृतवत्सलाः ॥४॥
अर्बुदोऽयं नगाधीशो, जीयाच्चिरमिलातले ।
प्रासादै र्यो समैर्जिनैरभ्रंलिहैः पवित्रितः ॥५॥

७

[ शार्दूलविक्रीडितम् ]

श्रीमद् देववरानतोत्तमपदाऽम्भोजद्वयः सिद्धिदः,
श्रीसर्वार्थविमानतो वृतसुख, श्च्युत्वाऽऽगतो भूतले ।
श्रद्धाध्याननिदानमानवगुणः, शर्म्मावली सद्गृहम्,
श्रीनाभेयजिनेश्वरोऽस्तु सुखदो, धर्मार्थिनां प्राणिनाम् ॥१॥
त्रैलोक्यं कलयन्करामलकव-द्योनिं श्रितो नाकुलीम्,
सर्वज्ञः पुरुषोत्तमोजिनवरः, शान्तः समाधिस्थितः ।
सद्बोधाश्रितहृद्यहृत्सरसिजः, सत्प्रेमराजन्मना,
भव्याम्भोजविभावसु र्विजयतां, श्रीमारुदेवप्रभुः ॥२॥
सम्यग्ज्ञानकलान्विता विदधता, प्रौढप्रतापश्रियो,
येनाऽज्ञानतमस्तति र्विनिहता, चेतः स्थिता प्राणिनाम् ।
सोऽयं मानस भूमिजार्त्तिविरुधां, संघातमुन्मूलयन्,
माङ्गल्यं धनराशिमाँस्तनुमतां, कुर्याद्युगादीश्वरः ॥३॥
सर्वज्ञानमयोजगत्त्रयगुरु र्यः, संश्रिता यं जनाः,
येन श्री-रचलावृताऽमरगणा, यस्मै नमस्कुर्वते ।
यस्माद् दूरगतं विमोहतिमिरं, यस्याऽस्ति सेव्यं वचो,
यस्मिन् गौरवता स्थिता जिनवरे, वन्दे तमा-दीश्वरम् ॥४॥
श्रीसिद्धाचलसानुरत्नविलसन्मूर्त्ते ! कृपावारिधे !
भव्याम्भोजविबोधनैकतरणे, राजत्प्रभाभास्वर ! ।
दुर्ध्यानाऽनलतप्तमेघपटल ! ग्लानार्त्तिहानिप्रिय !
त्वं क्रीडस्व मदीयमानसवराऽऽरामे युगादीश्वर ! ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



८

सकलकमलदलकरपदनयन !
प्रहतमदनमद ! भवभय-हरण !
सततममरनरनतपदकमल !
जय जय गतमदमदकलगमन ! ॥१॥

अमलकनकनगवर ! गतमरण !
क्षतजननमरण ! शमरससदन !
श्रवणकमलवनतपन ! गतभव !
भवभयमयहर मम जनम हन ॥२॥

अभयद ! भवदरजलधरपवन !
सबलमदनवनदहनजलधर !
व्यपगतमद ! शशधरवरवदन !
जगदघहर ! जयततनयसमय ! ॥३॥

तरलकरणहयवरदमनकर !
कनककजनवकगमन ! वरवचः ।
प्रथय परमपदमपदरधवलध्वज !
घनघनवररव ! जनशरण ! ॥४॥

परमपदरमण ! कमनकजरद !
शशधरकरहर ! नगधवलयश !
परमतकजगज ! सकलजनमनः-
कलकरलसदमरनग ! रचय शम् ॥५॥

[ शार्दूलविक्रीडितम् ]

इत्येवं प्रथमस्वरेण सकलाऽभीष्टार्थकल्पद्रुमः,
सद्भक्त्या प्रथमो जिनः स्तुतिपथं नीतो युगादिप्रभुः ।
दोषान्मेऽवगणय्यविश्वजनता त्राता गुण-स्थानकम्
दुर्भेद्यं प्रथमं भिनत्तु सपदि श्रेयः श्रियं यच्छतात् ॥६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१

श्रीमरुदेवा तनुजन्मानं मानवरत्नमुदारं रे ।
दारैः सह हरिभिः कृतसेवं, सेवकजनसुखाकारं रे ॥१॥

कारणगन्धमृतेऽपि जनानां, नानासुखदातारं रे ।
तारस्वररसजितपरपुष्टं, पुष्टशमाकूपारं रे ॥२॥

पारङ्गत मिह जन्मपयोधे, र्योधै-र्हितगुणधीरं रे ।
धीरसमूहैः संस्तुतचरणं, चरणमहीरुहकीरं रे ॥३॥

कीर-यशं यशसा जित-चन्द्रं, चन्द्राऽमलगुण-वासं रे ।
वासवहृदयकजाऽहिमपादं, पादपमिवसच्छायं रे ॥४॥

सच्छायाकब्बरपुरधराणी-धरणीधव मिव कामं रे ।
कामं नमत सुलक्षणनाभिं, नाभितनुजमुद्दामं रे ॥५॥

( शार्दूलविक्रीडितम् )

इत्थं तीर्थपतिः स्तुतः शतमखश्रेणीश्रितः श्रीनदी-
जीमूतोद्भुभाग्यसेवधि-रधि क्षिप्तः समग्रैर्गुणैः ।
श्रीमन्नाभिनरेन्द्रवंशकमला-केतु-र्भवाम्भोनिधौ-
सेतुः श्रीवृषभो ददातु विनयं, स्वीयं सदा वाञ्छितम् ॥६॥

२

आदिजिनं वन्दे गुणसदनं, सदनन्ताऽमलबोधं रे ।
बोधकतागुणविस्तृतकीर्तिं, कीर्तितपथमविरोधं रे, आदि. ॥१॥

रोधरहितविस्फुरदुपयोगं, योगं दधतमभंगं रे ।
भङ्गनयव्रजपेशलवाचं, वाचंयमसुखसङ्गं रे, आदि. ॥२॥

सङ्गतपदशुचिवचनतरङ्गं, रङ्गं जगति ददानं रे ।
दानसुरद्रुममञ्जुलहृदयं, हृदयङ्गमगुणभानं रे, आदि. ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाऽऽनन्दितसुरवरपुन्नागं, नागरमानसहंसं रे ।
हंसगतिं पञ्चमगतिवासं, वासवविहितांशंसं रे, आदि. ॥४॥
शंसन्तं पदवचनमनवमं, नवमङ्गलदातारं रे ।
तारस्वरमघघनपवमानं, मानसुभटजेतारं रे, आदि ॥५॥

[ वसन्ततिलकावृत्तम् ]

इत्थं स्तुतः प्रथमतीर्थपतिः प्रमोदा-
च्छ्रीमद्यशोविजयवाचकपुङ्गवेन ।
श्रीपुण्डरीकगिरिराजविराजमानो,
मानोन्मुखानि वितनोतु सतां सुखानि ॥६॥

३

[ स्वागतावृत्तम् ]

श्रेयसां पद ! जिनेन्द्र ! जय श्रीनाभिनन्दन ! जगत्त्रयबन्धो ! ।
भव्यलोचनसुधारसवर्षिन् ! हर्षतः स्तुतनरेशसुरेशैः ॥१॥
संस्तुतिस्तव विभो ! नृपताऽऽद्याः, सम्पदो वितनुते कियदेतत् ? ।
तां त्रिलोकविभुतामपि दत्ते, याऽनुभूतिविषयो हि तवैव ॥२॥
एकशोऽपि जिन ! यत्र पुष्करावर्त्तवृष्टय इवाऽभवंस्तव ।
सुप्रसादमधुरादृशो भवेत् तत्र शस्यकमलोद्भवश्चिरम् ॥३॥
संस्थिते त्वयि हृदीश ! नराणां, दूरमेव विपदः खलु यान्ति ।
किं हि तिष्ठति सुते विनतायाः, मन्दिरे फणभृतो विलसन्ति ॥४॥
त्वं पिताऽथ जननीगुरुरेकस्त्वं, प्रभु र्मम तथा जगतोऽपि ।
त्वां ततः शरण-मेक-मुपेतः, किञ्चिदस्मि भगवन्नभिवाञ्छन् ॥५॥
ज्ञानदर्शनचरित्रसमृद्धिः, प्राग् न मेऽस्ति विशदा सति चैवम् ।
यो भवेत् तव मतः सदुपाय, स्तेन मां शिवरमां नय नाथ ! ॥६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



४

[ अनुष्टुपवृत्तम् ]

आदिदेवेषु या भक्ति,-रादिदेवेषु या नतिः ।
आदिदेवेषु या पूजा, सा सा मुक्ति प्रदायिका ॥१॥

आदिदेवेषु यद्ध्यानं, आदिदेवस्य पूजनम् ।
आदिदेवस्य यन् मन्त्रं, तत्तन्मुक्तिप्रदायकम् ॥२॥

आदिदेवः सदा ध्येय, आदिदेवस्य निश्चयः ।
आदिदेवो हि भगवान्, स स मुक्तिप्रदायकः ॥३॥

आदिदेवो महान्देवो, जैनर्षीणां परागतिः ।
आदिदेवः सदा नित्यो, भवेत् मुक्तिफलप्रदः ॥४॥

आदिदेवस्तु को देवो, जैनर्षे! संशयो मम ।
भक्तत्वं विद्धि वृषभ-देवं जन्तोः परं पदम् ॥५॥

पठन्ति य इदं स्तोत्र-मादिदेवादिनामकम् ।
आदिदेव प्रसादेन, सद्गतिं यान्ति मानवाः ॥६॥

जीवन्मुक्तस्य जैनर्षे-रादि-देवो गतिर्मम ।
जीवात्मनां मुक्तिदाता सर्वेषा-मोप्सितप्रदः ॥७॥

५

कृपया प्रकटीकृताऽखिल-व्यवहारोत्तमधर्मसत्पथम् ।
प्रथमं जिननायकं मुदा, विनयेन स्तुतिकर्मतां नये ॥१॥

श्रुतत्वां मे श्रुती धन्ये, दृष्टत्वां चक्षुषी स्तुवे ।
कराभ्यां चर्चितत्वाभ्यां, कृतार्थोऽस्मि जिनेश्वर! ॥२॥

अभितः कृपाणधारा-प्रतिफलनवरात्रिरूपितत्वाभ्याम् ।
त्वद् भक्त्या धरणेन्द्रो नमिविनमिभ्याम् अदाद् विद्याः ॥३॥

जटाभ्यां शोभितस्वर्णवर्णत्वाभ्यां तवांसयोः ।
श्रीमेरोः पार्श्वयोर्नील, वनालीभ्यामिवाऽभवत् ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्रव्यभाव तमोरुद्धदृष्टे दिष्टया मम प्रभो ! ।
सूर्येन्द्वोरुदयो भूयात्, स्वविभादर्शितत्वयोः ॥५॥

जन्मस्नात्रमहानन्द-पदलाभार्हितत्वयोः ।
अष्टापदाद्र्योः केषां न सतां निविशते मनः ॥६॥

युष्मत्पदैकवचनान्यपदद्विवचनवचोविरचनेन ।
स्तुत इति मया प्रदेयाः प्रवचनचातुर्यमाद्याऽर्हन् ॥७॥

६

[ उपजातिवृत्तम् ]

श्रेयोलतापल्लवनैकनीरदं, त्वां देहिनां देव ! भवाब्धितीरदम् ।
आदिप्रभो ! भक्तिभरेण भूरिणा, स्तवीमि सेव्यं पूरुहूतसूरिणा ॥१॥

मूर्त्तिं तवेनेन्दुकलाविलासिनी, विलासिनी मुक्तकुमुन्महोदयम् ।
महोदयं वादिशते वितन्वती, वितन्वती वा शुभमत्र पावनी ॥२॥

त्रपावनीमापितवान् हिमालयं, हिमालयं शुभ्रयशोवितानतः ।
वितानतः स्वर्गिगणिः कलाधरः, कलाधर स्तारय मां भवापदः ॥३॥

भवाऽपद प्राणिहिता सदाऽऽपदाम्, सदा पदाम्भोजनमन्नरामहः ।
नराऽमहस्यालकदुःखतापनः, खतापनः शर्म्मकजप्रबोधने ॥४॥

प्रबोधनेतस्तवदीप्रशासनं, प्रशासनं प्राप्य कुवादिनोदयम् ।
दिनोदयं मोहनिशि प्रभो ! भवं, प्रभोऽभवं सिद्धसमाहितोऽधुना ॥५॥

हितो धुनानो जगतो दुरापदं, दुरापदं सद्विषतो विमोहन ! ।
विमोहनम्रामर ! हे विभो ! भवे, विभो ! भवेन्मे शरणं सदा भवान् ॥६॥

सदा भवान्ताहित शं मयाऽमुना, मयाऽमुना, त्वं स्तुतिमापितः प्रगे ।
पितः प्रगेयोरुगुणैरमामना, रमा ममा धेहि महोदयोद्भवाः ॥७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७

[ वसन्ततिलकावृत्तम् ]

भक्तार्त्तिनाशनकरं विशदप्रभावम्,
भक्तामरसुरनरेन्द्रनतक्रमाब्जम् ।
संसारसिन्धुतरणोत्तमपोतकल्पम्,
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥१॥

ध्यानस्थितं मुनिवरा वचनं त्वदीयम्,
हृद्गोचरं प्रविदधुः समशीलवन्तः ।
ते मोक्षसिद्धिवशगा वशिनो बभूवुः,
श्रीअर्बुदाचलवसद् वृषभं स्तवीमि ॥२॥

विघ्नानि यान्ति विततानि तव प्रभावा-
न्नाशं विभो! जगदनन्यहितानुबन्धिन् ।
सर्वार्थदाननिपुणो न विभुस्त्वदन्यः,
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥३॥

स्तोत्रप्रिया नरगणा भवशान्तिकारम्,
सौम्यं प्रभो! तव महागुणराशिमाशु ।
चित्ते विभाव्य भवभीतिपराङ्मुखाः स्युः,
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥४॥

संसारतापविधुराः परिणामसिद्धा,
स्तद्धेतुरत्र भवतचरणाश्रऽनुपातः ।
कस्त्वत्प्रभावविमुखो गुरुसङ्गरक्तः,
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥५॥

को बुद्धिमान्विदित्भूरिगुणप्रतापम्,
स्वल्पाणुकल्याणधाम विभवं जुषते विहाय ।
कालान्तकक्रमगतोऽपिभवान्तकारिन् !
श्री अर्बुदाचलवसद्वृषभं स्तवीमि ॥६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भव्या जना-स्तव विभो ! शरणं प्रपन्ना-
स्तीर्त्वाऽपमृत्यु-मनघाः शिवशर्म्मभाजः ।
रेजुः समस्तधरणीधवपूज्यपादः,
श्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥७॥

आदिप्रभो ! तव पदाब्जमहं प्रणम्य,
मुक्तोऽस्मि संसृतिभयाद् अखिलात् सुखेन ।
नाऽतः परं मम भयं भवजातदुःखा-
च्छ्रीअर्बुदाचलवसद्वृषभं स्तवीमि ॥८॥

८

## श्री शत्रुञ्जयगिरिस्तोत्रम्

(उपजातिवृत्तम्)

शत्रुञ्जयो नाम नगाधिराजः सौराष्ट्रदेशे प्रथितः प्रशस्तिः ।
तीर्थाधिराजो भुवि पुण्यभूमिस्तत्रादिनाथं शिरसा नमामि ॥१॥

अनन्ततीर्थाधिपसाधुवृन्दैर्या सेविता शान्तितपाभिवृद्धयै ।
सा पुण्यभूमिर्वितनोतु सौख्यं, जिनादिनाथं शिरसा नमामि ॥२॥

अनेकराज्याधिपमन्त्रिमुख्यै-र्विनिर्मिता सुन्दरचैत्यपंक्तिः ।
स्वर्भूमितुल्या भुवि सुप्रसिद्धा, तत्रा-दिनाथं शिरसा नमामि ॥३॥

विश्रामधामोमुनिसाधकानां, संसारतापै-र्हृतसाधकानाम् ।
यो यानतुल्यो च भवाऽपमार्गे, तमादिनाथं शिरसा नमामि ॥४॥

या पादपद्मैः पुनिता सुभूमि-रनन्तयोगीमुनिभिर्नितान्तम् ।
आकर्षणं चुम्बकरत्नतुल्यं, तत्रा-दिनाथं शिरसा नमामि ॥५॥

निसर्गरम्योदितनाकतुल्या, गिरीन्द्रसौगन्धितवृक्षराजिः ।
विचित्रवर्णैः सुमनोहरा च, तत्रादिनाथं शिरसा नमामि ॥६॥

शचीन्द्रदेवैः परिवेष्टिता च, नृत्यन्ति शृङ्गारभृताः सुभक्त्या ।
कुर्वन्ति वृष्टिं मधुगन्धपुष्पै स्तत्रा-दिनाथं शिरसा नमामि ॥७॥

स्वजीवितं पावनतामुपैति, ये पूजयन्ति प्रभुपादयुग्मम् ।
श्रीनाभिपुत्रं प्रथमं जिनेन्द्रं, युगादिनाथं शिरसा नमामि ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



९

[ अनुष्टुपवृत्तम् ]

शत्रुञ्जयः पुण्डरिकः, सिद्धिक्षेत्रं महाचलः ।
सुरशैलो विमलाद्रिः, पुण्यराशिः श्रियः पदम् ॥१॥

पर्वतेन्द्रः सुभद्रश्च, दृढशक्ति-रकर्मकः ।
मुक्तिगेहं महातीर्थं, शाश्वतः सर्वकामदः ॥२॥

पुष्पदन्तो महापद्म, पृथ्वीपीठं प्रभोः पदम् ।
पातालमूलं कैलासं, क्षितिमण्डलमण्डनम् ॥३॥

शतमष्टोत्तरं नाम्ना-मित्याद्युक्तममुष्य हि ।
महाकल्पे विजानीयात्, सुधर्मोक्त्ये' ति शर्मदम् ॥४॥

नामान्यमूनी यः प्रात-पंठत्याकर्णयत्यपि ।
भवन्ति सम्पदस्तस्य, व्रजन्ति विपदः क्षयम् ॥५॥

तीर्थानामुत्तमं तीर्थं, नगानामुत्तमो नगः ।
क्षेत्राणामुत्तमं क्षेत्रं, सिद्धाद्रिरयमीरितः ॥६॥

## श्री ऋषभजिनेन्द्र स्तोत्रम्

[ वंशस्थवृत्तम् ]

जयश्रियाम् एकपदं यदीयं, बभूव राज्यं जगतां सुखाय ।
विभक्तये च व्रतकेवलश्रीः, श्रीमद्युगादीशमिमं स्तवीमि ॥१॥

हितानि कुर्वन् पितरत्यनिन्दितो, य एव धर्मो जगतामपि स्फुटम् ।
सूतेऽमुष्याऽपि च यः पितामहो, मतः पुराणं पुरुषं स्मराम्यहम् ॥२॥

यतः स्म सर्वा प्रभवन्ति नीतयो, जनानुगा मुक्तिपथानुगा अपि ।
घनाघनौघादिव सर्वतो लता, स्तमादिमं देव मुपास्महे विभुम् ॥३॥

गृहीतिनां कर्मसु न स्फुटेष्वपि, स्वभावशुद्धाऽऽर्जव भक्ति शालिनाम् ।
बभूव शास्ता वृषभप्रभुः पुरा, येषां समस्तानपि युग्मीनो जनान् ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अयं विवर्तोऽस्ति यदेकहेतुकः, शरीरिणां क्लेशविचित्रतामयः ।
निरस्य मोहतमस्तदप्यगात्, पदं परं तं वृषभप्रभुं भजे ॥५॥

उपाधिजान् यः प्रविधूय विप्लवान् ब्रम्हतनुः (तनोति शं) सुयोगिनाम् ।
निरिन्धनो वह्निरिवाऽव भासते, निरञ्जनं तं पुरुषं स्मराम्यहम् ॥६॥

प्रभुः प्रजानां प्रथमं जिजीविषु, र्नियोजयन्कर्मसु ता बभूव यः ।
क्रमात्प्रबुद्धः परमार्थ देशनात्तथैव तेभ्यश्च वियोजयन्नपि ॥७॥

युगादिमं देव–मनन्त–देवसं-प्रवर्त्तकं सत्पुरुषार्थसम्पदाम् ।
प्रणौमि तं बोधिपदाप्तये किल, द्विषो व्यतिक्रम्य जयश्रियेऽपि च ॥८॥

## श्रीझगडियातीर्थमण्डनऋषभजिनेन्द्रस्तोत्रम्

[ वसन्ततिलकावृत्तम् ]

श्रीमत्पदाम्बुजलुठद् भवभीरुवृन्दैः ,
संनादितं प्रवरसद्म यदीयम् अच्छम् ।
देशान्तरागतसुभव्यगणैः प्रकीर्ण,
मादीश्वरं 'झगडिया' विलसन्तम् ईडे ॥१॥

भूत्या प्रसन्नमनसो विधिवद्यदीयाम्,
पूजां प्रफुल्लकुसुमोत्करतो विधाय ।
अक्षीणवित्तविभवाः सुरलोकपूज्या–,
आदीश्वरं झगडिया विलसन्तम् ईडे ॥२॥

दिव्यर्द्धिसिद्धिसमलङ्कृतचारुचैत्यम् ,
विभ्राजते प्रखरघण्टनिनादघुष्टम् ।
यस्य प्रधानपुरुषोपचितान्तरालम्,
आदीश्वरं झगडिया विलसन्तम् ईडे ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवाऽसुरेन्द्रनरनायकवन्दिताङ्घ्रिम् ,
सद् भक्तिभावितजनार्चितदिव्यमूर्तिम् ।
हृद्गोचरीकृतमलं समतां वहद्भिः,
आदीश्वरं झगडिया विलसन्तमीडे ॥४॥

संसारकूपपततां सुदृढं विशालम् ,
आलम्बनं सुहिततत्त्वविवेचितारम् ।
रागान्धिताऽक्षमनुजोष्णकरोपमानम्,
आदीश्वरं झगडिया विलसन्तम् ईडे ॥५॥

संतारकं निजपदाब्जनतप्रजानाम् ,
भास्वच्चराऽचरगणं प्रविलोकितारम् ।
सृष्टारमक्षयदयाञ्चितधर्मबोधम् ,
आदीश्वरं झगडिया विलसन्तम् ईडे ॥६॥

नुन्नोनयेन विनयोज्झितदेहिवर्गः,
संस्थापितो मुनिगणः सुदयाप्रधानः ।
सम्बोधितो जगति येन कलाकलापम् ,
आदीश्वरं झगडिया विलसन्तम् ईडे ॥७॥

को नाम यस्य महिमानमनन्तगेयम् ,
विस्तारतः कथयितुं विभुरस्ति लोके ।
लोकत्रयप्रथितकीर्तिवितानकं तम्,
आदीश्वरं झगडिया विलसन्तम् ईडे ॥८॥

२

[ मन्दाक्रान्तावृत्तम् ]

यो विश्वेषाम् अभय जनकः सत्यवाणीविलासो-
यः सत्त्वानां विधुरम् अखिलं नाशयत्वात्मभावात् ।
यः पारोक्ष्यं परगतं अजो-ध्यात एवच्छिनोति,
आदीशं तं वरझघडिया-भूषणं नौमि नित्यम् ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्यः शान्तिर्भवति मनना-द्यद्विभूतेर्जनानाम्,
आत्मानन्दः प्रभवति परोत्कर्षतादानदक्षः ।
बाह्यो भावस्त्यजति हृदयं शुद्धशान्त-स्वरूपम्,
आदीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥२॥

सोपानालिर्विलसति महाचैत्यसम्बन्धिनी या,
तामाश्रित्याऽक्षयसुखगता भव्यजीवा भवन्ति ।
मूर्त्तिं यस्य प्रवरविभया भ्राजमानां विलोक्य,
आदीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥३॥

मूर्तिं यावत्तव विषहरां शुद्धधर्मानुरक्ताः,
नो वीक्षन्ते परजनकृपाकांक्षिणो वीतमोहाः ।
पापच्यन्तेऽभयदभुवने तावदक्षीणपापा,
आदीशं तं वरझगडिया भूषणं नौमि नित्यम् ॥४॥

मोक्षाकांक्षा गतभवभयाः सिद्धयति त्वत्प्रणामात् ,
दुःप्राप्योऽसौ परमविभवाद् दुष्टकर्मारिमूलात् ।
सिद्धि साध्या गुरुमुखतया सर्वथा मानवानाम्,
आदीशं तं वर झगडिया-भूषणं नौमि नित्यम् ॥५॥

यस्याऽधीनं जगति विशदोद्धारकं धर्मवर्त्म,
यस्याऽधीनं जगदभिमतां शर्म्मसन्तानमिद्धम् ।
यस्याऽधीनं कलिगुणगणोद्भेदकं मुख्य तत्त्वम,
आदीशं तं वरझगडिया-भूषणं नौमि नित्यम ॥६॥

पारावारे जननमरणक्लेशवित्तो भवेऽस्मिन,
पीडयन्त-स्त्वच्चरणवनमनावम आसाद्य सद्यः ।
तीरोत्तीर्णाः सुखमनुभवन्तो न खिन्नाः परत्र,
आदीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥७॥

हृद्ये तत्त्वे परिणतमतिस्तावकीने महीने,
भव्यो नव्योऽनवरतमसौ संसृते-र्याति पारम् ।
स्मारं स्मारं दि तव पदं ध्यानमग्ना(अंतरात्मा) जनास्ते(?)
आदीशं तं वरझगडिया-भूषणं नौमि नित्यम् ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ३

[ अनुष्टुपवृत्तम् ]

कुम्भैर्मानमिवाऽम्भोधेः स्तवनं मादृशैस्तव ।
स्तोष्यामि तदपि स्वामिन् ! भक्त्या ह्यस्मि निरङ्कुशः ॥१॥

त्वदाऽऽश्रितास्तु त्वत्तुल्या भवन्ति भविनः प्रभो ! ।
यान्ति दीपस्य सम्पर्का-द्वर्त्तयोऽपि हि दीपताम् ॥२॥

माद्यदिंद्रियदन्तीद्राऽमदीकरणभेषजम् ।
तव स्वामिन् ! विजयते शासनं मार्गशासनम् ॥३॥

हत्वा घातीनि कर्माणि. शेषकर्माण्युपेक्षसे ।
भुवनानुऽग्रहायैव मन्ये त्रिभुवनेश्वर ! ॥४॥

पादलग्नास्तव विभो ! लङ्घन्ते भविनो भवम् ।
उदन्वन्तं पक्षिराज-पक्षमध्यगता इव ॥५॥

जयत्यनन्तकल्याण-द्रुमोल्लासनदोहदम् ।
विश्वमोहमहानिद्रा-प्रत्यूषं दर्शनं तव ॥६॥

त्वत्पदांऽभोजसंस्पर्शाद्दीर्यते कर्म देहिनाम् ।
इन्दोर्मृदुभिराप्यस्त्रैर्दन्तिदन्ताः स्फुटन्ति हि ॥७॥

वृष्टिर्वारिधरस्येव मृगाङ्कस्येव चन्द्रिका ।
जगन्नाथ ! प्रसादस्ते सर्वसाधारणः खलु ॥८॥

## ४

[ अनुष्टुपवृत्तम् ]

अपि सर्वात्मना ज्ञातु-मशक्या योगि-पुङ्गवैः ।
स्तुत्याः क्व ते गुणाः स्तोता क्वाऽहं नित्यप्रमद्वरः ॥१॥

तथाऽपि नाथ ! स्तोष्यामि यथाशक्ति भवद्गुणान् ।
दीर्घाऽध्वनि व्रजन् खंजः किं केनाऽपि निवार्यते ? ॥२॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवदुःखाऽऽतपक्लेश-विवशानां शरीरिणां ।
छत्रच्छायायमानांऽघ्रि–च्छाय ! त्रायस्व नः प्रभो ! ॥३॥

कृतार्थस्त्वं स्वयं नाथ ! कृते लोकस्य केवलम् ।
एवं विहरसे स्वार्थायोद्याति किमऽहस्करः ? ॥४॥

मध्यंदिनाऽऽदित्य इव त्वयि प्रभवति प्रभो ! ।
संकुचयत्यभितः कर्म देहच्छायेव देहिनाम् ॥५॥

तिर्यंचोऽपि हि धन्यास्ते ये त्वां पश्यन्ति सर्वदा ।
भवद्दर्शनवन्ध्यास्तु, त्रिविष्टपसदोऽपि न ॥६॥

प्रकृष्टेभ्यः प्रकृष्टास्ते भविकास्त्रिजगत्पते ।
एको हृदयचैत्येषु, येषां त्वमऽधिदेवता ॥७॥

एकं याचे भवत्पादान् ग्रामाद्ग्रामं पुरात्पुरम् ।
विहरन्नपि मा जातु, विहासीर्हृदयं मम ॥८॥

५

[अनुष्टुपवृत्तम्]

त्वत्प्रभावात्स्तवीमि त्वाम् अप्राज्ञोऽपिजगत्पते ! ।
शशिनं पश्यतां दृष्टि-र्मन्दाऽपि हि पटूयति ॥१॥

मोहान्धकारनिर्मग्न–जगदाऽऽलोकदीपकम् ।
आकाशवयनंतं ते स्वामिन् ! जयति केवलम् ॥२॥

प्रमादनिद्रामग्नानां, नाथ ! कार्येण मादृशाम् ।
एवं गताऽऽगतानि त्वं करोष्यर्क इवाऽसकृत् ॥३॥

जन्मलक्षाऽर्जितं कर्म त्वदालोकाद्विलीयते ।
कालेन दृषदीभूतमप्याज्यं वह्निना द्रवेत् ॥४॥

एकान्तसुखमातोऽपि साध्वी च सुखदुःखमा ।
यत्र कल्पद्रुमेभ्यस्त्वं विशिष्ट फलदोऽभवः ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समस्तभुवनेशेदं भुवनं भूषितं त्वया ।
राज्ञा पुरीव ग्रामेभ्यो, भुवनेभ्यः प्रकृष्यते ॥६॥

पिता माता गुरुः स्वामी, यत्सर्वेऽपि न कुर्वते ।
एकोऽप्यनेकीभूयेव, त्वं हितं विदधासि तत् ॥७॥

निशा निशाकरेणेव, हंसेनेव महासरः ।
वदनं तिलकेनेव, शोभते भुवनं त्वया ॥८॥

६

[ अनुष्टुपवृत्तम् ]

असद्भूतान् गुणान् जल्पन्, जनः स्तौतीतरं जनम् ।
गुणान्सतोऽपि ते वक्तुम् अक्षमोऽहं स्तुवे कथम् ? ॥१॥

तथाऽपि हि जगन्नाथ !, करिष्यामि तव स्तुतिम् ।
न ददाति दरिद्रः किं ?, श्रीमतामपिप्युपायनम् ॥२॥

युष्मत्पादैर्दृष्टमात्रै, रन्यजन्म कृतान्यपि ।
गलन्त्येनांसि शेफाली, पुष्पाणीन्दुकरैरिव ॥३॥

दुश्चिकित्स्यमहा मोह–सन्निपातवतामपि ।
स्वामिन् जयन्ति ते वाचो, ऽमृतौषधिरसोपमाः ॥४॥

चक्रवर्तिनि रङ्के वा, कारणं प्रीति–सम्पदाम् ।
समा त्वद्दृष्टयो नाथ !, वार्षिक्य इव वृष्टयः ॥५॥

क्रूरकर्महिमग्रन्थी–विद्रावण दिवाकरः ।
स्वामिन्नस्मादृशां पुण्यै, रिमां विहरसे महीम् ॥६॥

शब्दाऽनुशासनव्यापि, संज्ञा सूत्रोपमा प्रभो ! ।
जन्मव्ययध्रौव्यमयी, जयति त्रिपदी तव ॥७॥

यस्त्वां स्तौतीह भगवंस्तस्याऽप्येषोऽन्तिमो भवः ।
शुश्रूषते ध्यायति वा, यः पुनस्तस्य का कथा ? ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७

[अनुष्टुपवृत्तम्]

अवज्ञायाऽज्ञतां स्वस्य, सर्वज्ञ त्वां स्तवीम्यहम् ।
यन्मां मुखरत्येषा, दुर्वारा भक्तिमानिता ॥१॥

जयन्त्यादिमतीर्थेश !, त्वत्पाद-नखदीप्तयः ।
वज्रपञ्जरतां यांत्यो, भवाऽरित्रस्त-देहिनाम् ॥२॥

देव ! त्वच्चरणाम्भोजम् ईक्षितुं राजहंसवत् ।
धन्याः प्रतिदिनं दूरात्, अपि धावन्ति देहिनः ॥३॥

घोरसंसारदुखार्तैः, शीतार्तैरिव भास्करः ।
शरणीक्रियसे स्वामिं, त्वमेवैको विवेकिभिः ॥४॥

ये त्वां पश्यन्ति भगवन् !, नेत्रैरनिमिषैर्मुदा ।
परलोके ऽप्यनिमिषी-भावस्तेपां न दुर्लभः ॥५॥

देव ! त्वद्देशना-वाग्भि,-र्याति कर्ममलो नृणाम् ।
क्षीरेण क्षमैवस्त्राणा, मिव मालिन्यमांजनम् ॥६॥

स्वामिन्नृषभनाथे' ति, जप्यमाना तवाऽभिधा ।
आलम्बते सर्वसिद्धि-समाकर्षणमन्त्रताम् ॥७॥

न वज्रमपि भेदाय, न शूलमपि हि छिदे ।
तेषां शरीरिणां नाथ !, येऽधिन्वद्भक्तिवर्मिताः ॥८॥

८

[अनुष्टुपवृत्तम्]

त्वां जडोऽपि जगन्नाथ !, युक्तमानी स्तवीम्यहम् ।
ऌला अपि हि बालानां युक्ता एव गिरो गिरौ ॥१॥

देव ! त्वामाऽऽश्रयन् जन्तु-र्गुरुकर्म्मापि सिध्यति ।
अयोऽपि हेमीभवति स्पर्शात्सिद्ध-रसस्य हि ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वां ध्यायन्तः स्तुवन्तश्च, पूजयन्तश्च देहिनः ।
धन्याः स्वामिन्नाऽऽददते मनोवाग्वपुषांफलम् ॥३॥

पृथिव्यां विहरतः स्वामिन्नपि ते पादरेणवः ।
महामतंगजायन्ते । पापद्रून्मूलने नृणाम् ॥४॥

नैसर्गिकेण मोहेन, जन्मान्धानां शरीरिणाम् ।
विवेकलोचनं नाथ ! त्वमेको दातुमीशिषे ॥५॥

सुचिरं चञ्चरीकन्ति, ये भवत्पादपद्मयोः ।
तेषां न दूरे लोकाऽग्रं, मेर्वादि मनसामिव ॥६॥

देव ! त्वद्देशनावाग्भिर्गलन्त्याऽऽशु शरीरिणाम् ।
कर्मपाशाः जम्बूफलानीव वारिद–वारिभिः ॥७॥

इदं याचे जगन्नाथ !, त्वां प्रणम्य मुहुर्मुहुः ।
त्वयि भक्तिस्त्वत्प्रासादात् अक्षयास्त्वब्धिवारिवत् ॥८॥

## ९

[अनुष्टुप्वृत्तम्]

स्वामिन् ! क्व धी-दरिद्रोऽहं, क्व च त्वं गुणपर्वतः ।
अभिष्टोष्ये तथापि त्वां, भक्त्याऽतिमुखरीकृतः ॥१॥

अनन्तैर्दर्शन-ज्ञान–वीर्याऽऽनन्दैर्जगत्पते ! ।
रत्नै रत्नाकर इव, त्वमिहैको विराजसे ॥२॥

देवेह भरतक्षेत्रे चिरं नष्टस्य सर्वथा ।
धर्मस्याऽसि प्ररोहाय, बीजमेकं तरोरिव ॥३॥

अनुत्तरसुराणां त्वं, तत्रस्थानामिह स्थितः ।
वेत्सि छिनत्सि सन्देहं, न माहात्म्याऽवधिस्तव ॥४॥

फलं त्वद्भक्तिलेशस्य, निवासः स्वर्गभूमिषु ।
यत्सुराणां समग्राणां, महर्द्धिद्युतिभास्वताम् ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देव ! त्वद्‌भक्तिहीनानां, तपांस्यतिमहान्त्यपि ।
अबोद्‌घृणामिव ग्रन्थाऽभ्यासः क्लेशाय केवलम् ॥६॥

यस्त्वां स्तवीति यो द्वेष्टि, समस्त्वमुभयो स्तयोः ।
शुभाऽशुभं फलं किन्तु, भिन्नं चित्रीयते हि नः ॥७॥

शुश्रियापि न'तोषो'मे, नाथ ! नाथाम्यदस्ततः ।
भगवन् ! भूयसी भूया–त्त्वति भक्तिर्ममाऽक्षया ॥८॥

१०

देवैरप्यपरिज्ञेयगुणं कः स्तोतुमीश्वर ?
त्वां स्तोष्यामस्तथापीश !, विलसद्‌बालचापलाः ॥१॥

तपस्यतामप्यऽधिकास्त्वां नमस्यन्ति ये सदा ।
वरिवस्यन्ति ये तु त्वां, योगिनामपि तेऽधिकाः ॥२॥

नमस्यतां प्रतिदिनं, विश्वाऽऽमोकदिनेश्वर ! ।
धन्यानाम् अवतंसन्ति, त्वत्पादनखरश्मयः ॥३॥

न किञ्चत्'कस्यचित्'साम्ना, बलात् वा गृह्यते त्वया ।
त्रैलोक्यचक्रवर्ती त्वं, तथाऽप्यसि जगत्पते ! ॥४॥

स्वामिंस्त्वमेको जगतां, समं चेतस्सु वर्तसे ।
पीयूषदीधितिः सर्व–, जलाशय–जलेष्विव ॥५॥

त्वां स्तोता'स्तूयते देव ! सर्वैं स्त्वामर्चिताऽर्च्यते ।
त्वां नन्ता नम्यतेः सर्वा, त्वयि भक्तिर्महाफला ॥६॥

त्वं देव ! दुःखदावाऽग्नि, तप्तानामेकवारिदः ।
मोहान्धकार मूढाना-मेक दीपस्त्वमेव हि ॥७॥

रोराणामीश्वराणां च, मूर्खाणां गुणिनामपि ।
साधारणोपकारी त्वं, छायाद्रुम इवाऽध्वनि ॥८॥

For Private And Personal Use Only

११

[ अनुष्टुपवृत्तम् ]

नमस्तुभ्यं जगन्नाथ ! त्रैलोक्याम्भोजभास्कर ! ।
संसार-मरु-कल्पद्रो ! विश्वोद्धरण-बान्धव ! ॥१॥

वन्दनीयो मुहूर्तोऽयं, यत्र ते धर्मजन्मनः ।
अपुनर्जन्मनो जन्म, दुःखच्छिद्विश्वजन्मिनाम् ॥२॥

युष्मज्जन्माऽभिषेकाऽम्भः, पूरैराप्लाविताऽधुना ।
अयत्नक्षालितमाला, सत्या रत्नप्रभा प्रभो ! ॥३॥

मनुष्याः खलु ते धन्याः, ते त्वां द्रक्ष्यन्त्यहर्निशम् ।
यथा समयमेव त्वां, द्रष्टारः कीदृशा वयम् ? ॥४॥

भरत-क्षेत्र-जन्तूनां, मोक्षमार्गोऽखिलः खिलः ।
त्वया नूतनपान्थेन, नाथ ! प्रकटयिष्यते ॥५॥

साऽस्तु तावत्तव सुधा-सध्रीची धर्मदेशना ।
त्वद्दर्शनमपि श्रेयो, विश्राणयति जन्मिनाम् ॥६॥

न किञ्चिदुपमापात्रं, भवतो भव-तारक ! ।
ब्रूमस्त्वत्तुल्यमेव त्वां, यदि ते तर्हि का स्तुतिः ? ॥७॥

नाऽस्मि वक्तुमलं नाथ ! सद्भुतानपि ते गुणान् ।
स्वयम्भुरमणाम्भोधेर्मातुम् अम्भांसि कः क्षमः ? ॥८॥

१२

[ शार्दूलविक्रीडितम् ]

शान्ताकारतया मुखाम्बुजविभा, विभ्राजते भासुरा,
भव्यानां शमदायिनी शशिनिभा, यस्याऽक्षयार्थ-प्रदा ।
तं भक्ताऽभय दायकाऽमरतरु, देवाऽसुरैः संस्तुम,
भूभूषाऽर्बुद-भूषणं भवभिदं, नौम्यादिनाथं मुदा ॥१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तीर्थानां प्रथम-प्रवृत्तिजनकं, भूभामिनी स्वामिनं,
आद्यं विश्व-विकासकारणधुरां, वोढारमादि-क्षणे ।
दिव्याऽऽनन्द विभाविता धर धरा-नामान मुच्चश्रियम्,
भूभूषाऽर्बुद-भूषणं भवभिदं नौम्यादिनाथं मुदा ॥२॥

धन्योऽयं गिरिरर्बुदो गिरिगणे, यत्पाद-पङ्के रुह-
द्वन्द्वेनाऽङ्कित-सानुरुत्तम जन, ध्यानादि रूढ श्रिया ।
तं तीर्थीकृतभूतलं भुवि नृणामुद्धारकं भाविनाम्,
भूभूषाऽर्बुद-भूषणं भवभिदं नौम्यादिनाथं मुदा ॥३॥

विभ्राजन्मुकुट-प्रभा-भर नमन्नाकीश्वर-प्रार्थितम्,
भव्यर्द्धि प्रमिते सुधा-धवलिते, धाम्नि स्वयं संस्थितम् ।
वन्दारु-प्रथु-कर्म-कन्द-दलने, दत्तैक-दृष्टि-क्षणम्,
भूभूषाऽर्बुद-भूषणं भवभिदं नौम्यादिनाथं मुदा ॥४॥

निर्मायं निरयक्षिति-क्षयकरं, निर्मान मिर्मत्सरम्,
निष्कामं कमनीय-कान्ति-कलितं, निर्धूत कर्मावलीम ।
निर्दोष-निररि-प्रकाण्डम्-अमलं, निर्नाथ-नाथोपमम्,
भूभूषाऽर्बुद-भूषणं भवभिदं, नौम्यादिनाथं मुदा ॥५॥

यो ध्यानं शुभमानसौकसि शुभं, विस्तारयत्यञ्जसा,
दासत्वं दलयत्यनल्प-भयदं, शान्ति सदा यच्छति ।
तं भूरिश्रियम् आतनोति विपदं, निर्मूलयत्यङ्गिनाम्,
भूभूषांऽर्बुद-भूषणं भवभिदं नौम्यादिनाथं मुदा ॥६॥

यं देवाऽसुर-मानवेन्द्र-निकरा भक्त्योल्लसन्मानसा,
दृष्टवाऽनन्तकृपा-मयं शिवसुखं, संसाधयाञ्चक्रिरे ।
द्वन्द्वातीतम् अहर्निशं समतया तं तस्थिवासं प्रभुम्,
भूजूषांऽर्बुद-भूषणं भवभिदं नौम्यादिनाथंमुदा ॥७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



य: सन्ध्याऽभ्रसमं निरक्ष्य विभवं, सांसारिकं सत्वरम्,
जग्राहाऽशिवशान्तये शिवपथ-प्रख्यापनेऽदुर्बलाम् ।
दीक्षां भागवतीं तमद्भुतयशो,-राशिं कृपा वैभवम्,
भूभूषांऽर्बुद-भुषणं भवभिदं, नौम्यादिनाथं मुदा ॥८॥

१३

[ प्रभातीवृत्तम् ]

ऋषभ-योगीश्वरं, भजतजगदीश्वरं,
जन्तुगण शङ्करं गतविकारम् ।
सकल भवभयहरं, वृषभ-लाञ्छनधरं,
प्रथमतीर्थङ्करं विजय कारकम् ! ऋषभ० ॥१॥

विमलगिरि-पूर्व-गिरिराज-वासरकरं,
सुमरुदेवोदरा करज हीरम् ।
जगति गति-विततर कुमति मत-धनधना-
घनघटा-विघटनोत्कट-समीरम् । ऋषभ० ॥२॥

मदन-मद-कन्द-निःकन्दनाऽमन्दतर-
धार-तरवारिम्-अमर गिरि धीरम् ।
कुशल-हरि चन्दन-प्रकर-नन्धनवनं,
कुनय-घन-रेणु-संहरण-नीरम् । ऋषभ० ॥३॥

प्रणत-विबुधेन्द्र-दनुजेन्द्र मनुजेन्द्रगण !,
विहित-वन्दनमिनं जैन-चन्द्रम् ।
त्रिजगदानन्दं, नाभिनृपनन्दनं,
पाप-संताप-चन्दनमनिद्रम् । ऋषभ० ॥४॥

विगत-सकलापदं, सम्पदां कारणं,
कठिन-ममता-मही-भेद-सीरम् ।
अखिल-मकराकर-प्रकर-वर-सुचिरतर,
गरिमधर-चरम-सागर-गभीरम् । ऋषभ० ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्त-गोवदन-चक्रेश्वरी विहितपद-
कमलयुगोपासनं समितशान्तिम् ।
सुविमलेक्ष्वाकु-वर-वंश-भूषण मणि,
तप्त-तपनीय-कमनीय-कान्तिम् । ऋषभ० ॥६॥

निहित कुमतौघ काकारि-मद-वदन-रवि,
मोदित-क्रम-विनत-भव्य--कोकम् ।
विशद-भगणेन्द्र-शिवचन्द्र-परचन्द्रिका,
ऽमलयशः संधवलित त्रिलोकम् । ऋषभ० ॥७॥

( शार्दूलविक्रीडितम् )

लोकालोक विलोकनैक सुविधौ विज्ञान सल्लोचनोऽ-
मन्दानन्द घन द्रुमौघजलदो, ऽयं श्री युगादीश्वरः ।
इत्थं वाचक 'पुण्यशील गणिनां', भक्त्या मुदाऽभिष्टुतो,
भुयाद्दूरि विभुतये च भवतां, भव्यात्मनां प्राणिनाम् ॥८॥

१४

[ अनुष्टुपवृत्तम् ]

गुणांस्तवयथाऽवस्थान्, वयं वक्तुमनीश्वराः ।
स्तुमस्तथाऽपि, प्रज्ञा हि त्वत्प्रभावाद् भृशायते ॥१॥

त्रस-स्थावर-जन्तूनां, हिंसायाः परिहारतः ।
स्वाभिन्नभयदानैक-सत्रिणे भवते नमः ॥२॥

नमस्तुभ्यं मृषावाद-परित्यागेन सर्वथा ।
पथ्य-तथ्य-प्रियवचः, सुधारस पयोधये ॥३॥

भगवन्नदत्तादान-प्रत्याख्यानखिलाऽध्वनि ।
प्रथमायाऽध्वनीनांय, नमस्तुभ्यं जगत्पते ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अखण्डित ब्रह्मचर्य-महातेजो विवस्वते ।
भगवन्मन्मथध्वान्त-मथनाय नमोऽस्तु ते ॥५॥

सर्वमेकपदे नाथ ! पृथिव्यादिपरिग्रहम् ।
पल्लवत्त्यक्तवते, तुभ्यं मुक्ताऽऽत्मने नमः ॥६॥

तुभ्यं नमः पञ्चमहा-व्रत धारककुद्मते ।
संसार-सिन्धु-तरण-कर्मठाय महात्मने ॥७॥

महाव्रतानां पञ्चानां, भिंव पञ्चाऽपि सोदशः ।
बिभ्रते समितिस्तुभ्यमादिनाथ ! नमो नमः ॥८॥

आत्मारामैकमनसे, वचः संवृत्ति शालिने ।
सर्व-चेष्टा-निवृत्ताय, नमस्तुभ्यं त्रिगुप्तये ॥९॥

## १५

अर्बुदगिरिवर भूषण मदूषणं, प्रथम तीर्थङ्करनाथम् ।
स्तुतिपथ-मानेताऽस्मि, प्रसृमर महिमान-मतिमानम् ॥१॥

कल्पद्रु इव ते पादौ, मनोऽभीष्टार्थ-दायकौ ।
सेव्यावुपान्तविश्रान्त-मां केषां नैव धीमताम् ॥२॥

आसादि यत्प्रसादाद्, धर्मः शिवशर्म्मकृद् भवद्रुपञ्चम् ।
पितरौ तावभिवन्दे, प्रसृतमां दुष्प्रतीकारौ ॥३॥

अथाऽसाधारण सौभाग्य-भवद्रथरूप-निरूपणे ।
भुया व्यापृतमाभ्यां, स्व-चक्षुभ्यां सफलोऽस्म्यहम् ॥४॥

एतद्गिरिसत्काभ्यां, त्वद्योगात्सर्वतीर्थभूताभ्याम् ।
मङ्गल भवनतमाभ्या मधित्य कोपत्य काभ्यां स्तात् ॥५॥

चलनप्रवृत्तमाभ्यां, त्वद्यात्राकरणक्षणे ।
एताभ्यामर्बुदोत्तंस !, पादाभ्यां पुण्यम्-आप्नुयाम् ॥६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदा त्वद्दर्शनं लेभे, दूरीभूत (भयोस्तदा) ।
तिर्यग्नरकदुर्गत्योः, स्वप्नेऽपि व्यरमद्भयम् ॥७॥

त्वद्धर्मोप्तितः पूर्व-मनुत्पन्नभयोः किल ।
देवमान(व)सद्गत्योः, न वासं कः समीहते ? ॥८॥

इत्येकवचनान्यपद-द्वित्वोक्तिभिः स्तुतो वृषभः ।
देवोऽर्बुदगिरि-मौलिः कलयतु लीलां मनोऽन्तर्मे ॥९॥

१६

[ शार्दूलविक्रीडितम् ]

भव्याम्भोज-विकास-वासरमणिं चिन्तार्थ-चिन्तामणिं,
श्रीमन्नाभिनरेन्द्र-वंश-विमलाऽलङ्कारमुक्ता फलम् ।
कल्याणाऽऽवलि-वल्लि-पल्लव-घनं, पापोष्म सच्चन्दनं,
स्तोष्य भक्तियुतोऽहमादिम जिनं माद्देभ-पञ्चाननम् ॥१॥

संसाराम्बुधि-मज्जतां-भवभृतां, पोतस्त्वमेव प्रभो !,
त्वं कारुण्यनिधिर्भवाचल पविः कल्पद्रुमो देहिनाम् ।
त्वं दुःखौघ विनाशकः शमसुधा, धारो धरित्रीविभुः,
प्रोद्यद्भावयुतो ममाऽसि भगवन् ! भूयास्सदा प्रीतये ॥२॥

त्वं माता जनकस्त्वमेव सुगुरु-र्बन्धुस्तथा त्वं मम,
त्वं स्वामी किल दुःखिताऽखिल जने, वात्सल्यदस्त्वं जिन !
त्वं संसारसमुद्र तारण तरी, प्रायः प्रियः प्राणिनाम्,
त्वं श्री सिद्धि वधू वरो मयि जने दुःखक्षयं त्वं कुरु ॥३॥

रागद्वेषमहारिभिः प्रमथितो मायामहा धूर्तितः,
स्वामिंस्त्वां शरणाश्रितोऽस्मि जनता, हर्षप्रकर्ष प्रद ! ।
तन्मे देहि धियं यथा न भवति-त्वद्वैरिणां सङ्गम-
स्तेन स्यां शिवसौख्यभाजनमहं त्वत्तः प्रसादात् सदा ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाथ ! त्वं प्रथमो नृपः समभवो भिक्षाचरोऽपि क्रमात्,
तीर्थेशः प्रथमो विभुश्च भविनां मोक्षैक संसाधकः ।
यत्पुत्रो भरताधिपः प्रथमतः सच्चक्रवर्त्तिस्तथा,
यन्माता प्रथमं गता शिवपदं, सोऽस्तु प्रभुर्भूतये ॥५॥

श्री मंस्त्वत्प्रद पद्मयो मैम मनो भृङ्गे-भ्रमन् स्वेच्छया,
श्रीसर्वज्ञ ! कदा रमिष्यति सदा, रामारमा-निस्पृहः ।
तत्त्वं नाथ ! सनाथतां मयि कुरु प्रक्षीण पापोदये,
त्रायन्ते किल वत्सलाः श्रितजने स्वामिन् ! महान्तौ क्षितौ ॥६॥

धन्यः कोऽपि वासरो शुभमयो, यामः स एव क्षणः,
सोऽपि सौख्यकरो स्वभावमधुरो, यस्मिन्मुदा दृश्यते ।
जानेऽहं तव पाद पद्म पुरतो तिष्ठेत्चिदानन्दभाक,
नांसा न्यस्तसुलोचनः करयुगं संयोज्यसौख्यंश्रितः ॥७॥

विघ्न व्रात महेभ-दर्प्पदलनो मृगयङ्गना कामुकः,
शुद्धध्यान विधान निर्जितमहा, मोहान्धकारावलिः ।
विश्व व्यापि महा प्रभाव भवनं भव्यैः समासादितं,
श्रीमनादिजिनेश्वरः प्रकुरुतां सौख्यं मनोवाञ्छितम् ॥८॥

[ स्रग्धरावृत्तम् ]

इत्थं दुष्टाष्टकर्माऽपगत कलिमलः केवलाऽऽलोक-युक्तः,
कारुण्याम्बुप्रवाहः प्रवर गुणगणाऽऽधोर धौरेयमुख्यः ।
श्रीमत्स्याद्वादविद्या जलधिशशिकरो ज्ञात-तत्त्व-प्रमेयः,
प्राज्यं सौख्यं करोतु प्रथमजिनपतिः संस्तुतः शुद्धभक्त्या ॥९॥

For Private And Personal Use Only

## श्री केसरीया तीर्थमण्डन ऋषभ जिनेन्द्र स्तोत्रम्

[ पञ्चचामरवृत्तम् ]

प्रकृष्ट-कृष्ट-लोकवृन्द संनत क्रमाम्बुज !
प्रशान्तशान्त देहि कामदाह वारिदानन ! ।
प्रभात-भात-भानु-भासमान-पिङ्गल-प्रभ !
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥१॥

विदेश-देश-वासिनो जना अनेकधा-रता,
निवृत्ति वृत्ति शालिनोऽदरा : समेत्य पुञ्जत : ।
सुकुङ्कुमस्य पूजयन्त्य हो वपु स्त्वदीभयम्,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ॥२॥

प्रकृष्ट नीलमीलरत्न-सुन्दर-द्युति व्रज-
स्त्वदीय देहज : सुजात पुण्य पुञ्जशालिनाम् ।
विराजते विशिष्ट-पाप-हारकः सदोज्ज्वलो,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥३॥

समृद्धि-सिद्ध-दानद-श्रेयक्षल क्ष-सेवित !,
प्रचण्ड-लोक-संस्थिताऽरि वृन्द-कष्ट-नाशन ! ।
सुधा धराधिपाऽधरी-कृताऽखिलाङ्गि धारिणे,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥४॥

विचित्र चित्र मण्डकत्रयाङ्गि ते सुमन्दिरे,
विराजमानराजराज चर्चित-क्रमाम्बुज !
सराग-राग-हारिणे विहारि-वृन्द- तायिने,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥५॥

चमत्कृतिः सदा त्वदीय पाद पङ्कज श्रिता,
प्रमादकारि मोद धारिणां सुलोचनाम्बुज ।
विशिष्ट शिष्ट नैकधा स्वरुप दीप्ति दायिने,
नमोऽस्तु ने सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशाल शालशालमान धाम धारिणे महा-,
धराधर प्रधान दुर्ग मार्ग भीति हारिणे ।
सदा नदत्यहो यदीय तूर्य वृन्द मद्भुपम्,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥७॥

अमन्द मन्द भावना मरुप्रदेश पाविने,
कलौ मलौ घ हारिणेऽघ हारिणे सुदेहिनाम् ।
विभिन्न भिन्न चेतसा मखण्डितोग्र दीप्तये
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥८॥

स्वभाव भाविताऽऽत्मना सुपुण्यशालिनाऽङ्गिना,
प्रभातकाल उत्तमं हि केसरप्रियाऽष्टकम् ।
सुखपदं सुभण्यते सदैक भावतो हृदि,
तदा क्रमेण शैव सम्पदं श्रयेत्स मानवः ॥९॥

[ शार्दूलविक्रीडीतम् ]

सर्वैश्वर्य महार्यवर्य महिमं, यत्प्रातिहार्याष्टकं,
दिष्ट्या दृष्टि पथेन दृष्टमतनोत्केषां न बोधिप्रियम् ।
श्रेयोऽनन्तसुखोदयं च तमहं, सार्वं युगादिं स्तुवे,
नानुष्यैक भवावतार सफली,—कार प्रकाराप्तये ॥१॥

स्वामिंस्त्वं घनघातिकर्म कदनै, जातोऽस्यशोको तत्—,
स्थानेऽशोक तरु र्वे भूव यदि हा, शोकः स्वय किं त्वयम् ।
जज्ञे केवल-सेवयेव जिन ते, नम्राङ्गिना स्यु र्द्रुया-,
चैत्यद्रुः किमिवैष शोक-हरणे, बद्धप्रतिज्ञोऽभवत् ॥२॥

जिऽये येन हृषीकसेनमखिलं, प्रञ्चप्रपञ्चं प्रभो !,
मिथ्यात्वोदयमव्रतं च भवता, दग्धेव्रता चाशुभम् ।
तेनाऽनन्द-विनोद-मेदुरहृदस्ते देशनोर्व्यामिवाऽ-,
स्वप्नाः किं किल पञ्चवर्ण-कुसुम, श्रेणीं ववर्षु विभो ! ॥३॥

स्वामिन्नस्मय विस्मयोदयि मुदा, सार-प्रसारस्तव,
व्याख्यानावनि-वेद-दिक्षु दिशतो, धर्मं चतुर्धा ध्वनिः ।
दिव्यः श्रव्य रस श्चतुर्मुखजुषः संविस्तृतः सर्वतः
किं जेतुं चतुरः कषाय विषयान्निःशेष दोष प्रभून् ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्त्वाऽतत्त्व विवेकि वाक्य विभव ! त्वय्येव विश्रामिणी,
सम्यग्ज्ञानचरित्रदर्शनमयी, रत्नत्रयी त्रौकते ।
त्रैलोक्योन्नतिपारिणी शिवपदाऽऽनन्दोदयि न्यद्गमुता,
नान्यत्रेव ततः किमस्ति शिरसि, छत्रत्रयं ते विभो ! ॥५॥

रागद्वेष महाद्विषौ विधिनिधि, ध्यानद्वयाऽद्वैततः
सर्वा जय्यमहौ जसावपि सुखेऽनेश ! त्वया निर्जितौ ।
येनाऽनन्त भवावतार निरतौ, तेनेव किं तज्जयोद्
भूते ते यशसी सुचामर मिषात्पार्श्व-द्वये संस्थिते ॥६॥

कष्टा रिष्ट निकृष्ट पुष्ट निकटाऽदृष्टादिदोषद्विपो,
न्मादोद्रे भिदा त्वमेव पुरूषे, वेकोऽसि सिंहिःस्वयम् ।
त्रैलोक्ये भविनां शिवाध्व सुपथां, येनेव तेनोन्नतम्,
दिव्यं किं शुशुभे शुभोदय मयं 'सिंहासन' सार्व ! ते ॥७॥

त्वय्ये वोदित मोक्षयो दितजयं, ज्ञानादिकं क्षायिकम् ।
सर्वास्विऽप्रकृति स्थितं, भवभयो । च्छेद-प्रदं बोधिदम् ।
तेन त्वं त्वरितं तदर्पण विधे, भव्योत्मनस्तारये–,
तीवाऽज्ञप्ति पदं तनोति सुगिरा, किं दुन्दुभि स्ते पुरः ॥८॥

सार्वं सर्व तमो पहत्वपदवी–, सिद्ध्यै स्वयं सेवते,
किं बिम्बं सवितु महोदय मयं, तेजोऽत्र किं वाऽद्भुतम् ।
अष्टाष्टट महेन्धनाऽति दहने, वह्निः स्वशक्ति प्रभुम्,
किं वा प्रार्थयते तवे' ति विबुधो, वक्तीश ! भामण्डलम् ॥९॥

दिव्याऽशोक तरूं सुरैः प्रकटितं, सूतप्रकाशं ध्वनिं,
नव्य श्रव्य पदार्थ सुपथं, सिंहासनं चामरम् ।
छत्रैक त्रितयं मनोहरत्वं, सद्दुन्दुभि भासुर–,
ज्योतिर्मण्डल मित्यवेक्ष्य न मुदस्ते मस्य तेनुः प्रभो ! ॥१०॥

इत्थं स्तौति मुदा (?) मुदास्रसभृ, द्यः सार्व ! सर्वोत्तराऽ,
मेयैश्वर्य महार्य मार्ज सुखदाऽसंरव्य श्रियामायम् ।
निष्णातः सविवेक हर्ष विनय, श्रीसूरि हेत्वे हित,
श्रेणीं संश्रयते सुबोधि विधिना, श्रीधर्महंसोदयांत् ॥११॥

For Private And Personal Use Only

[ अनुष्टुपवृत्तम् ]

अस्तु श्री नाभिभूर्देवो, विपन्नाशन-कर्मठः ।
पवित्रः पोषयन्नाकं, सुधर्माधिपतिः श्रिये ॥१॥

जाड्य-खण्डन-पाण्डित्य—प्रौढो जगति विश्रुतः ।
छिनत्तु वस्तमस्तोमं, पावको-नाभि-नन्दनः ॥२॥

सूर्यानन्दी महाध्यासी, संयमन्याय्यधीश्वरः ।
समवर्त्ती जगन्नेता, जीयादादि-जिनेश्वरः ॥३॥

सनाकिनादृतो दद्याद्, वृषभो निवृं ते मुंदम् ।
यो दोषाचरणाऽप्रीति, रनिकारे शिवे स्थितः ॥४॥

असंस्तुतो जडैं र्बिभ्र-दपाशं सर्वदाशयम् ।
नाभेयः श्रेयसे भूया-दपूर्वो भुवनेश्वरः ॥५॥

पायादनल-सख्या,-तिबन्धूरो हरिणादृतः ।
अहिंसोल्लासमातन्वन्, श्री नाभेजो महाबलः ॥६॥

न सेवितः किं पुरुषैः ? सर्ववित्ताप वर्जितः ।
भवद्वेषी च वृषभः श्री-दो जयति नूतनः ॥७॥

चन्द्राऽवदात देहश्री, र्वृषभा-सन तत्परः ।
शिवालय्यार्चिर भितः पाया-दीशानः प्रथमो जिनः ॥८॥

क्षमा प्राग्भार धर्तारं, यं श्रीमान् श्रयते हरिः ।
बिभ्राणः कमलं शुभ्रं, सोऽनन्तः पातु नाभिभूः ॥९॥

स्वयम्भूर्ब्रह्मलोकेशं, शुक्ल-पक्ष-समाश्रितः ।
सकलं कमलासीनः, कुरुतां वृषभः सुखम् ॥१०॥

एव-मादिमुनेः स्तवनं यः, पापठीति शठतामपहाय ।
विघ्नघातनिविधौ पटिमानं, तस्य बिभ्रति दशाऽपि दिगीशः ॥११॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ शार्दूलविक्रीडितम् ]

आनन्द-द्रुम-कन्दली सुचरित,-श्रेणी पताकाञ्चलाः,
क्षुद्रोपद्रव तान्ति शान्ति कविता, व्यापार वारिच्छदाः ।
ब्रह्मज्ञानमहः स्फूलिङ्ग ततयः, श्रीवल्लरी पल्लवाः,
श्रीनाभि-प्रभव-प्रभु-क्रमनख ज्योत्स्नाऽङ्कुराः पान्तु वः ॥१॥

आद्यः सम्प्रति सर्व वेदिषु जित, स्त्वेकाङ्क पङ्काविव,
स्थानं तद्गुणिनो ददाति हृदये, तद्देहिनां सन्ततम् ।
यश्चित्रं किल वृत्तवान् शतगुणां, वृद्धिं ददौ सान्वये,
स श्रीमान् वृषभः शुभाय जगतां, चिन्तामणिश्चिन्तितम् ॥२॥

[ वसन्ततिलकावृत्तम् ]

आद्यो नृपेषु सकृपेषु जिनाधिपेषु,
लोकेऽप्यनल्प परिकल्पित शिल्पमार्गः ।
देवाधिदेव ऋषभोपयुक्तः,
स्वर्णच्छविः सपदि यच्छतु वाञ्छितानि ॥३॥

[ द्रुतविलम्बितम् ]

अवतु वो धरणीन्द्र फणावली, प्रतिफल-द्विम-लाकृति सप्तकः ।
सकल-कर्म-जयार्थ मिवाऽष्टधा, कृततनुः प्रथमो जिन पुङ्गयः ॥४॥

[ शार्दूलविक्रीडितम् ]

उद्वाहे प्रथमोत्वरः किल कला, शिल्पादिके यो गुरु-
र्भूपश्च प्रथमो यतिः प्रथमक, तीर्थंकरश्चादिमः ।
दाताऽघः परिपात्रमाद्यमपरं, सिद्धो यदम्बादिमः,
सच्चक्री प्रथमश्च यस्यतनयः, सोऽस्त्वादिनाथः श्रिये ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ उपेन्द्रवज्रावृत्तम् ]

कौ पार्श्वैस्थौ वनभुवि युवां, सेवकौ नाभि-सूनोः ?
किं निःसङ्गाः फलतु युवयोः ? गच्छत्वं गच्छ न त्वम् ।
इत्थं कुद्धयन्-नमि विनमि वाग्, लज्जया नाग-भर्तुः,
किञ्चिन्मौन स्मितसवलितं, वीक्षितं पातु युष्मान् ॥६॥

[ स्रग्धरावृत्तम् ]

भङ्क्तु पञ्चाऽऽशु पञ्चा, शुग सुभट शरान्, पञ्चमुख्यव्रतश्री-
क्रीडा सौख्यान्यवाप्तुं, सममिव समितीः पञ्च संसेवितुं वा ।
आसीद्यः पञ्चमूर्ति, र्नमिविनमि धृतो-ध्वासिधारा चतुष्क-
क्रोडान्सः कान्तकायः स हरतु दुरिता, न्यादि-तीर्थङ्करो वः ॥७॥

[ शार्दूलविक्रीडितम् ]

यं शैवा समुपासते 'शिव' इति, 'ब्रह्मे'ति वेदान्तिनो,
बौद्धा 'बुद्ध' इति प्रमाणपटवः 'कर्ते'ति नैयायिकाः ।
अर्हन्नित्यथ जैन-शासन-रताः 'कर्मे'ति मीमांसकाः
सोऽयं वो विदधातु वाञ्छित फलं, श्रीनाभिसूनुर्जिनः ॥८॥

[ इन्द्रवज्रावृत्तम् ]

दद्यान्मुदं सर्व-समान-बुद्धि, र्जगद्गुरुर्नाभि-नरेन्द्र-सूनुः ।
उपार्जितं ज्ञान-महा-निधानं, दत्तां कुटुम्बाय विभज्य येन ॥९॥

[ शार्दूलविक्रीडीतम् ]

धन्यात्वं मरुदेवि ! तीर्थकृदयं, यस्याः सूनुत्वीदृशो,
निन्द्याः सुरनायिका अपि वयं, यासामपत्यं नहि ।
एनं देहि यथाऽमृतैर्निजवपुः, संश्लिष्य सिञ्चाम इ-
त्यात्तः स्मेर मुखः सुरीभि रभितः, श्री आदिनाथः श्रिये ॥१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नव्योद्वाहविधौ वधू-द्वय-युतं, पुत्रं सवित्री रती,
प्रीत्या सन्निभमिव स्मरं किल ददौ, यं विन्यसत्याशिषम् ।
कल्पद्रुः किल जङ्गमः किमधुना, पत्रद्वयेनोद्गत,
स्तत्वं स्याः शतशाख इत्यनुदितं, स श्रेयसे नाभिभूः ॥११॥

[ अनुष्टुपवृत्तम् ]

आदिनाथ ! जगन्नाथ ! शरणागत-वत्सल ! ।
नमामि नाथ ! सर्वज्ञ ! भूयो भूयो नमाम्यहम् ॥१॥
आर्त्तानां भुवि लोकानां, भक्त्याऽऽधीनस्त्वमत्र वै ।
सन्ततं कृपया स्वामिन् ! प्रादुर्भवसि भूतले ॥२॥
तत्त्वतो रादिरेव त्वं, लोकाऽनुग्रह काम्यया ।
आदिनाथाऽभिधो लोके, मारुदेवीसुगर्भजः ॥३॥
नाभिराज सुनो ! देव ! ख्यातो जन्मी महागुरुः ।
लीलया दर्शयन् सर्वं, लोकानन्ते त्वमेव हि ॥४॥
सर्वदा विद्यमान स्सन्, केवली नामतो ननु ।
मिथ्या-ज्ञान-विनाशाय, भगवन् ! त्वं करुणां कुरु ॥५॥
मुक्तये जगतां नाथ ! जगत्यां भवतारक ! ।
नानानामधरो देव ! त्त्वमेव पूज्यसे जनैः ॥६॥
सुभक्त्या तव लोकानां, विचित्राः श्चित्त-वृत्तयः ।
अतो नेक स्त्वमेकोऽपि, भज्यन्ते यत्र कुत्रचित् ॥७॥
भेद-भावं परित्यज्य, ये जनाः पर्युपासते ।
त एव सफला नित्यं, कृतकृत्यास्त एव हि ॥८॥
मङ्गलं मङ्गलार्थी च, जयार्थी लभते जयम् ! ।
कामार्थी लभते कामान् तत्तदर्थी मनोगतम् ॥९॥
विद्यार्थी लभते विद्यां, धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रं, मोक्षार्थी लभते गतिम् ॥१०॥
जपेद्वृषभ सुस्तोत्रं, षड्भिर्मासैः फलं लभेत् ।
संवत्सरेण सिद्धिं च, लभते नाऽत्र संशयः ॥११॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ वसन्ततिलकावृत्तम् ]

श्रीहीरसूरिकुलकौस्तुभसूरिवर्य्य,
श्रीमद्धिमाचल–सतीर्थ्य–गुमाननूत्या ।
पूत्यासदा पठितया ननु 'भव्य' वाण्या,
सुप्रीणितो जगति सत्वरम् आदिनाथः ॥१२॥

२२

निरुपधि वैभवकर वै भवकर वैरिच्छिदे युगादीशम् ।
विगतधनमोहमाये नमोहमाये शिवस्य रसिकस्ते ॥१॥
वाणी वरला भवतो वरला भवतो विशुद्धगतिचरणा ।
गुण-गण–सज्जनकमलं, सज्जनकमलं विभूषयति ॥२॥
तव पुरतः केवलिनः केवलिनः कामकारणं विषयाः ।
यत्त्वं वाक्–पर महसा परम-हसाऽर्हं व्यधामोहम् ॥३॥
धृतिपरमोदकसरसा मोदक सरसा गमोर्भिभृताभवता ।
विघटितमानसमस्तं मानसमस्तं मलमनादि ॥४॥
यदि दित परमतमोहं परमतमोहंतु ते श्रुतं वचनम् ।
तम्मे न व्याकरणे नव्याकरणेऽपि भारते प्रीतिः ॥५॥
विदलितमाय तवेडातमाप्य तवेडातमाप्य तरति जनः ।
विपुलायामां तरसा यामान्तर सार भव सरितम् ॥६॥
दूरितराजसभावं राजसभावन्च ते श्रुतमधीत्य ।
अपृणामाऽशान्त रसाः शान्त रसास्वादने सुचिरात् ॥७॥
यर्हि तमोऽसमवासर ! सभवांसरदुपरमं भवाँस्तर्हि ।
यामाप मुदं भरतोऽदम्भरतो वेदकोऽन्थस्ताम् ॥८॥
अपवारण सङ्गरतो रण सङ्गरतो जनस्त्वया शममितः ।
तत्संसदि चतुरानन ! चतुरा न न वर्णयन्ति त्वाम् ॥९॥
नोद्धरसि किमु निरञ्जन ! मुनिरञ्जन ! मां भवाऽटवीपतितम् ।
असदुन्मादेकमना देकमना यत्त्वयि जनोऽयं ॥१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भयभित् ! तव प्रसादा तवप्रसादाद्रुशेऽस्य शिव-नगरी ।
शमरसतोऽतनुललना तनुललना दजनि यो विमुखः ॥११॥

परिचित संवरदारा वरदाराः श्रीपतिरपि प्रकृति लोला ।
तच्चेतो मे धावति मेधावति सुरमणौ भवति ॥१२॥

श्री शत्रुञ्जय शेखर-जयशेखर सूरिणा सदेष्येत् ।
तव निर्मल रुचिरायतिरुचिरा यतिवल्लभासेवा ॥१३॥

## २३

[ अनुष्टुपवृत्तम् ]

जयाऽखिल-जगन्नाथ !, जय विश्वाऽभय-प्रद ! ।
जय-प्रथम-तीर्थेश !, जय संसार-तारण ! ॥१॥

अद्याऽवसर्पिणी लोक-पद्माकरदिवाकर !
त्वयि दृष्टे प्रभातं मे, प्रनष्ट तमसोऽभवत् ॥२॥

भव्यजीव मनोवारि, निर्मलीकार-कर्मणि ।
वाणी जयति ते नाथ !, कतकक्षोद-सोदरा ॥३॥

तेषां न दूरे लोकाग्रं, कारुण्य-क्षीर-सागर ! ।
समारोहति ये नाथ !, त्वच्छासनमहारथम् ॥४॥

लोकाऽग्रतोऽपि संसार, मग्रिमं देव ! मन्महे ।
निष्कारण जगद्बन्धु, यत्र साक्षात्त्वमीक्ष्यसे ॥५॥

त्वद्दर्शनमहानन्द-स्यन्द-निष्यन्दलोचनैः ।
स्वामिन् मोक्ष-सुखाऽऽस्वादः, संसारेऽप्यनुभूयते ॥६॥

रागद्वेष-कषायाद्यै रुद्धं जगदरातिभिः ।
इदमुद्वेष्ट्यते नाथ !, त्वयैवाऽभय सत्रिणा ॥७॥

स्वयं ज्ञापयसे तत्त्वं, मार्गं दर्शयसि स्वयम् ।
स्वयं च त्रायसे विश्वं, त्वत्तो नाथामि नाथ किम् ॥८॥

नानावस्कन्दसङ्ग्राम-हत-ग्राम-भुवो मिथः ।
मित्रीभूयेह तिष्ठन्ति, राजानस्तव पर्षदि ॥९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वत्पर्षद्य यमायतः, करटी करटस्थलीम् ।
करेण केसरिकरं, कृष्ट्वा कण्डूयते मुहुः ॥१०॥

इतश्चमहिषमिव, महिषोऽयं मुहुर्मुहुः ।
स्नेहतो जीह्वया मार्ष्टि, हेषमाणमिमं हयम् ॥११॥

लीलाछोलितलाङ्गूलः, उत्कर्णोन्नमिताऽऽननः ।
घ्राणेन व्याघ्र वदनं, जिघ्रत्ययमितो मृगः ॥१२॥

पार्श्वयोरग्रतः पश्चाल्ललन्तं निजपोतवत् ।
अयं तरुणमार्जारः, समाश्लिष्यति मूषिकम् ॥१३॥

अयं च निर्भयो भोगं, कुण्डलीकृत्य कुण्डली ।
अदभ्रबभ्रोरम्यर्णे निषीदति वयस्य-वत् ॥१४॥

देव ! ये केचिदन्येऽपि, जीवा शाश्वत वैरिणः ।
निर्वैरास्तेऽत्र तिष्ठन्ति, त्वत्प्रभावोऽसमोह्ययम् ॥१५॥

## २४

[ अनुष्टुपवृत्तम् ]

जय त्रिभुवनाऽधीश !, श्री युगादि-जिनेश्वर ! ।
नम्रामर-शिरोरत्न-दीपनीराजितक्रम ! ॥१॥

अज्ञान-तिमिरं-हत्वा, नव भानुरिव प्रभो ! ।
प्रकाशित-जगद्विद्या, व्यवहार ! नमोऽस्तु ते ॥२॥

निष्कषाय तया चेतः, पटे शुभ्रगुणे तव ।
रागो लगतु मा किन्तु, तेनाऽरञ्जि कथं जगत् ? ॥३॥

सद्गन्ध-शीतल-स्वाच्छौ, नत्वा पादौ तव स्तवम् ।
कृत्वा श्रुत्वा च नाथ ! स्या-दक्षाणां युगपत्सुखम् ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिलोकीसुभगं वीक्ष्य, त्वां चलाया अपि प्रभो ! ।
स्तम्भ-स्वेदार्द्रता-भावो, जायते कस्य नो दृशः ? ॥५॥

शमार्द्रे सुकृताऽऽख्याती, भवभ्रान्तिभवं मम ।
त्वत्पाद-पादपच्छाया तापं निर्वापयेच्चिरात् ॥६॥

तच्चित्रं यन्निरालम्बं, चिरं भ्रान्तं भवार्णवे ।
त्वां चाऽऽलम्ब्य मनो मेऽद्य, शमनीरे ममज्जयत् ॥७॥

धर्मकोशाद्धनं दत्ते, सेवकेभ्यः प्रभु र्भवान् ।
प्रसन्नः समता वस्तु, कस्मैचन पुनर्निजम् ॥८॥

तथा मम जगन्नाथ !, प्रसीद नतवत्सल ! ।
यथा क्षणमपि स्वामिन् !, नैवोत्तरसि चेतसः ॥९॥

सर्वोऽपि वदति श्राद्धो, यत्त्वं मे नाथ ! जीवितम् ।
नाहं तु जीवितं येन, चलं मे त्वं तु निश्चलः ॥१०॥

न कुले न बले रूपे, न च श्रीषु न ते विभोः ।
यत्किञ्चद्वीतरागत्वं, तत्र लीनं मनो मम ॥११॥

नानानामानि सङ्कल्प्य, विवदन्तां विचक्षणाः ।
मन्दमेधा स्त्वहं नाथ ! नीरागत्वे तव स्थितः ॥१२॥

विकल्पकल्पनालोल, कल्लोलै र्नाथ ! रक्ष मे ।
धूयमानं मनःपोतं, यत्तरामि भवाम्बुधिम् ॥१३॥

वपुः शस्तं प्रसन्नाः दृग्, जन्तु-रक्षाकरं वचः ।
अतस्त्वयि कथं नाथ !, सतां न रमते मनः ॥१४॥

भ्रमन्तु भावाः प्रस्तावात्, इतरे तारका इव ।
सर्वज्ञ ! तव तत्त्वाद्रौ ध्रुवीयति मनस्तु मे ॥१५॥

अलं परिग्रहै रम्यै, रपि क्लेशकरैः प्रभो ।
सदाऽऽनन्दमयं देहि, भावदेव ! प्रियं पदम् ॥१६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२५

जयश्रियां-धाम ! सुधाम-धारिन् ! सुत्राम दामाऽर्चित! देवदेव ! ।
त्रिलोकपूजाऽतिशयाऽभिराम !, प्रकाममानन्दन नन्दनेतः ॥१॥

वर्गत्रयस्यार्जन बद्ध चेतसः, सुचेतसः कर्मसु सत्सुसूद्यमः ।
ददात्यहो नाथ ! तव स्तवोऽत्रत बुधादू यतन्ते सकलाः फलार्थिनः ॥२॥

अयं सदानन्द पदाऽऽप्तये संता, हेतु विशुद्धः प्रथितो मनीषिषु ।
इति प्रवीणा मुनयोऽपि ते स्तवे, रतिं दधन्ते भवभोगनिस्पृहाः ॥३॥

प्रवर्धमानोत्तम मङ्गलावलीः, श्रियः सदानन्दरसोभिवर्भिताः ।
सुखानि विश्वाशयविश्रमास्पदं, प्रभो ! वशत्व नयते तव स्तवः ॥४॥

त्रातारमेकं परमं वदन्ति यं, मनस्विनोऽभीष्टदधर्मदानतः ।
जिनेन्द्र ! तस्मै भवते सदा जगत्-पितामहाय प्रभुतात्मने नमः ॥५॥

स्तुतिमिति तनुते यस्ते, मघव महामुनिसुन्दर सुताङ्घ्रेः ।
स भवति गुणसम्पदा समस्ते कलभिति तद्वितराचिरान्ममाऽपि ॥६॥

२६

[ वसन्ततिलकावृत्तम् ]

श्रीअर्बुदाचल-विभूषण ! दूषणाली-
वन्ध्यार्जुनाभविभ ! नाभिभवाऽऽद्यदेव ! ।
स्वामिस्तव स्तवपथे पथिकीकरोमि,
वाचं शुची·करण-कारणतोऽहमर्हन् ! ॥१॥

कौतूहलान् न न च काव्यकलाव लेपान्-
नामुष्मिकैहिककलाऽऽप्त्यभिलाषतो वा ।
किन्त्वीश ! ते स्तुतिविधावधियामधीशो-
ऽप्यस्मिन् प्रवृत्तमति रस्मि भवाभिभूत्यै ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेगादगं जिगमिषामि तदङ्गपङ्गु-
गत्या जिगीर्गगनगप्रबलाऽनिलस्य ।
मातुं मरुत्पथमथो विदधे तदिच्छाम्,
मित्स्यामि चाऽन्तिमसमुद्रजलं पलैस्तत् ॥३॥

स्प्रष्टुं करेण तरणिं स्पृहयामि वा ऽहम्,
सर्वौर्वरामपि पदै र्यदिवा पिधित्स्ये ।
यत्सर्वथा ऽमिति कथापथहृद्गुणस्य,
स्तुत्यां यतेऽहमिहते सहसाकिलैवम् ॥४॥

शक्तिं निजामनव-धार्यं तथाऽपि कार्ये-
ऽमुष्मिन्नुपक्रमवतो भवतः प्रसादात् ।
कर्मक्षयैक फललाभमभीप्सतो मे,
नूनं जिनेश ! सफलो भविता श्रमोऽसौ ॥५॥

नाना भवोप जनितं भविनामनन्तम्,
वश्यं कथाऽपि वितथी कुरुतेऽघ-सङ्घम् ।
निर्णिक्तभक्तिभरजस्य महामहिम्नोः
देव ! स्तवस्य तु तवाऽत्र विधौ कथा का ॥६॥

नो मत्सरः स्फुरति कोऽपि परामरेषु,
चेतोऽनुराग वशगं त्वयि देव ! नैव ।
संन्तस्तथाऽपि निबिडाद् गुण पक्षपातात्,
त्वामेव सेवकतया प्रभुमभ्युपेताः ॥७॥

स्वामिन्नसङ्ख्यसुखदं भवभीभिदं त्वा,
हित्वाऽऽरि रात्स्यति सुरानपरान् नरो यः ।
विश्वोत्तमाऽमृतरसं सरसं व्यपास्या-
संतोषमेष विषमं विषमा पिपासेत् ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रागोऽङ्ग-नाङ्ग परिषङ्ग-विधि-प्रसिद्धः,
क्रोधोऽपि हेतितति सङ्गतिबुद्धिवोध्यः ।
मोहोऽट्टहास-नटन क्रिययाऽवसेयः,
कामं कमण्डलुधृतिप्रथितं ह्यशौचम् ॥९॥

स्फारक्षसूत्रकरधारणलिङ्गगम्य-
मज्ञानमप्यखिलमातृमुखैरपीक्ष्यम् ।
मूर्त्तिष्वीपि भगवन् ! भवतः परेषाम्,
हा हा ! महानिविडदोषविडम्बनैव ॥१०॥

दूरादपास्तवनितातनुसङ्गशस्त्रा-
ऽप्यङ्काभिशङ्कयमदनादिकविक्रियोयाम् ।
शान्ता कृतौ प्रतिकृतावपि ते यतीन्द्र !,
नीरागतैव जगताऽपि विभाव्यतेऽलम् ॥११॥

आस्तां भवान् भुवननाथ ! दृषन्मयीयं,
त्वन्मूर्त्तिरप्यसुमतां तनुते प्रमोदम् ।
साक्षादवेक्षित वपूंष्यपि सौख्यदानि,
न स्युर्नृणां मतिमतां परदैवतानि ॥१२॥

दूरेऽथवेन्दुरुदकप्रतिबिम्बताऽपि,
तन्मूर्त्तिरेव तनुते मुदमीश ! यद्वत्
तद्वद्विलोकितविभास्वरमण्डलाऽपि,
किं तारकावलिरलं प्रमद-प्रदाने ? ॥१३॥

अेकान्त-शान्तरस-सागर-मग्न-मूर्त्ते-
र्या ते जगत्त्रय-पतेऽद्भुतसाम्यमुद्रा ।
रोषादिदोषकलुषीकृतविग्रहाणाम् ,
क्व स्यादसौ हरिहरप्रमुखामराणाम् ? ॥१४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विश्व-त्रयाऽतिशयिविस्मयकारिरूपं,
देवं भवन्तमवलोकयतोऽपि न स्यात् ।
यस्याऽऽस्य मुल्लसित लोचन-युग्ममीश !,
काष्ठं पशुः किमथवा दृषदेष साक्षात् ॥१५॥

यन्न प्रसीदसि विभोऽद्भुतभक्तिभाजि,
निन्दापरे च नरि नैव करोषि रोषम् ।
त्वां लक्षणेन खलु विश्व-विलक्षणेनाऽ-
नेनैव दैवतधिया मुनयः प्रपन्नाः ॥१६॥

देवाऽन्य दैवतगणादगुणान् नृणां या,
सामान्यसत्त्वसदृशत्वभृतोऽमृतेच्छा ।
साऽत्यन्तनिर्धनजनादति भूरि भूति-
प्राप्तावतीव महती मनसः समीहा ॥१७॥

विश्व-त्रयप्रकटदैवतचेष्टितं ये,
देवं मदा दववदन्ति भवन्तमेतम् ।
ते सूर बिम्बमभि-रेणुभरं किरन्ति,
दन्तै रदन्ति गिरिसारभरं च दर्पात् ॥१८॥

त्वं देव ! मोहित जगत्त्रय मानसोऽपि,
मिथ्यादृशो ददसि नो मनसः प्रमोदम् ।
आप्यायिताऽखिल महीतललोचनोऽपि,
किं कोकलोक मुख मुज्ज्वलयेत् ? कलावान् ॥१९॥

योऽनेकशोऽपि ददृशे न भवान् दृशेश !,
स्यादस्य देव ! पर तीर्थकरे ऽनुरागः ।
आजन्मतोऽप्यनवलोकित रत्नजाते-
श्चेतो रति र्भवति हि प्रतिकाचखण्डम् ॥२०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवान्तरस्य भगवंस्तव चान्तरं यो,
नो बुध्यते विबुधबोधकबुद्धिवन्ध्यः ।
निम्बाम्रकाचमणिसर्षपमन्दराद्रि-
भावोत्करे किमु भिदां स विदांकरोतु ॥२१॥

देवाः परे परमडम्बर धारिणोऽपि,
नो लेशतोऽपि तिरयन्ति तव प्रभावम् ।
खद्योतका द्युतितर्ति दधतोऽ पि किं वै,
वैवस्वतं मुकुलयन्ति किल प्रतापम् ॥२२॥

नैकप्रकल्पित विकल्पजुता अपि स्यु-
र्जोषं जुषः सदसि ते जिन ! तेऽन्य तीर्थ्याः ।
किं घोर घूत्कृतिपरा अपि नैव घूका
मूका भवन्ति सवितुर्महसां समूहे ॥२३॥

ये त्वन्मतामृतरहस्य रसैकचित्ता,
नूनं मतिर्न रमतेऽन्य मतेषु तेषाम् ।
आस्वादितामृतरसस्य नरस्य किं स्यात्
पातुं स्पृहाऽपि सलिलान्यपि पंकिलानि ? ॥२४॥

चेत्कस्यचिद् गतमते न मतं मतं ते,
स्यादस्य विश्वमहितस्य ततः क्षितिः का ? ।
रुच्या न चौरजन चेतसि चन्द्रिका चे-
च्छोच्या भवेत्किमियताऽपि जगत्प्रियेयम् ॥२५॥

पश्यन्त्यभव्य भविनो नहि दूरभव्या-
श्चाशेष विश्वविदितं भगवन् ! भवन्तम् ।
किंवा जगत्प्रकटमम्बुजबन्धुबिम्ब-
मालोकयन्ति जनुषान्धजनाः कदाचित् ? ॥२६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिथ्यात्वमोहविषमाहिमहाविषेण,
ग्रस्तस्य विश्व जगतो गतचेतनस्य ।
अस्य प्रबोधन विधावनुपाधिशुद्धं,
न त्वन्मतामृत-मृते ह्यपरोऽस्त्युपायः ॥२७॥

तप्तं तपो न वितर्तं न जपो न जप्तः,
कल्पता न दैवतशतक्रमपर्युपास्तिः ।
नानाक्रिया अपि कृता नहि मुक्तये स्यु,
स्त्वच्छासनं जिन ! विना भविनां कदाचित् ॥२८॥

तप्त्वा तपांस्यपि परैः शरदां शतानि,
या यत्नवद्भिरपि सम्पद वाप्यते नो ।
चित्रं जना जिनपते ! त्वदुपशपुण्या,
दन्तर्मुहूर्त्त विहितादपि तां लभन्ते ॥२९॥

त्वद्दर्शनं जगति न प्रतिभाति किञ्चि-
दन्तर्गतं तव यदीश ! न शासनस्य ।
किं सम्भवेदिह भवेऽपि महन्महस्त-
दन्तर्भवेन्न यदहर्पतिकान्तिपुञ्जे ॥३०॥

या वागगोचरसुरासुरसौख्यसम्पद्,
या मानुषा सुखसमृद्धिरतिप्रवृद्धा ।
मोक्षैकमुख्यफलभृद् भवदीय भक्तेः,
प्रासङ्गिकं फलमिदं प्रवदन्ति सन्तः ॥३१॥

[ शार्दूलविक्रीडितम् ]

स्वामिन् श्री गुरुदेव सुन्दर गुणास्त्वय्येव सर्वे व्यधुः,
स्थाने नूनमशेष दोष निवहाश्चान्ये श्रथो नाकिषु ।
तन्मा भूज्जननान्तरेऽपि हि कदाऽप्येतेषु देवत्वधीः,
स्वप्नेऽपि प्रतिजन्म सम्भवतु मे, नित्याप्तबुद्धि-स्त्वयि ॥३२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ स्रग्धरावृत्तम् ]

एवं सर्वान्य-देवानधिगतमहिमश्रीसमालिङ्गिताङ्गः,
श्री नाभेयो जिनेन्द्रोऽर्बुदगिरि शिखरोत्तंसभूतोऽभिनू (?) तः ।
भक्त्युत्कर्षात् सहर्षं तनुतर मतितो, ऽप्याभवं मेऽव्ययश्री,
कैवल्यातुल्यमोदोदय सुखनिधये, बोधिलाभाय भूयात् ॥२३॥

२७

[ उपजातिवृत्तम् ]

श्री आदिनाथं नतनाकिनाथं, लक्ष्म्या सनाथं कृतपापमाथम् ।
संवेगतान्यत्कृतहेमहीरं, संसार-दावा-नल-दाह-नीरम् ॥१॥

निर्वाण-योषिद्-घन-बद्धरागं, सश्रीक-भालं गद-शाखि-नागम् ।
संस्तौमि संत्रासित कर्म-वीरं, संमोह धूली हरणे समीरम् ॥२॥

विशारदोद्गीत गुण-प्रतान, मीडे वृषाङ्कं विगताऽभिमानम् ।
सद्-ब्रह्म शस्त्रा-पहृता-शरीरं, मायारसा दारण सार-सीरम् ॥३॥

कल्याण-कन्दोदय-कन्द-कल्पं, सद्वाञ्छितार्थैक विधान कल्पम् ।
आदिं प्रभुं पुण्य शमाऽऽकीरं, नमामि वीरं गिरि सार धीरम् ॥४॥

चेक्रीय्यतामृषभतीर्थकरेण सातं, भव्याङ्गिनां जिनवृषाऽनघं सत्पुराणम् ।
निर्धूत-हाटक-वसूल-सदङ्ककेन, भावावना-मसुर दानव मानवेन ॥५॥

उत्तानताऽनुकृतचारु चतुर्गतीनि, दुर्नीति नीर निधि सन्तरणो रुनूनि ।
भक्त्याऽवन भ्रवर वासव-नाग वृन्द, चूला विलोल कमलावलि मालितानि ॥६॥

नैसर्ग रोहिततमैः करजै र्विभान्ति, दीर्घप्रभैरतुल-सौख्य-कराणि यानि ।
संप्राप्त रुप जन संस्तुति सत्पदानि, संपूरिताऽभिनत-लोक समीहितानि ॥७॥

श्री मारुदेव वृषभाङ्कित पाद-युग्मा, पादानामुक्ति रमणी कर पीडनस्य ।
त्वत्कानि सङ्कट घनाऽऽशुग सोदराणि, कामं नमामि जिनराज पदानि तानि ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[ मन्दाक्रान्तावृत्तम् ]

सत्कारुण्याऽमृतरससृतं, पावनं सिद्धिकारं,
हंसानां ते प्रवचनमिदं, मानसाभं जिनेश ! ।
सेवाम्यद्धा सकमलमलं, पाप तापाऽपहेशम्,
बोधागाधं सुपद-पदवी-नीर-पूराऽभि-रामम् ॥९॥

रेवा तावद्विमल सलिला नर्म्मदा शर्म्मदाऽपि,
काशीः काशी कलुष हरिणी तुङ्ग भद्रा विभद्रा ।
तुङ्गा गङ्गा जिनमतसरो-नाम्न मन्तः पवित्रम्,
जीवाहिंसा-विरललहरी- संगमागाह-देहम् ॥१०॥

भो भो भव्या ! यदि शिवपुरे मोक्ष लक्ष्मी बुभुक्षा,
सिद्धान्ताब्धिं समुपसरत प्रोल्लसन्न्याय चक्रम् ।
निर्णिक्लान्तः परमगिरिमा गार मानन्द हेतुम्,
चूलावेलं गुरुगममणी-संकुलं दूर पारम् ॥११॥

मोहद्रोह क्षितितनु रुहोन्मूलने हस्ति हस्तम्,
प्रोद्भिन्दन्तं परमतरजःपुञ्ज-मुद्भुत शस्तम् ।
संसेव्यं श्रीजिनजनगणैः कामदं संश्रितानाम्,
सारं वीरा-गम-जलनिधिं सादरं साधु सेवे ॥१२॥

[ स्रग्धरावृत्तम् ]

दन्तश्रेणी प्रभाऽधः कृत कुमुद हसत्, क्षीर सच्चन्द्र-चन्द्रः,
स श्रीमानादिनाथः प्रभवतु भविनां, भावुकाय प्रकामम् ।
यस्य व्याख्यानकाले किरति सुरगणः, पुष्पवृष्टी विचित्रा,
आमूलालोल धूली बहुल परिमला लीढ लोलालि मालाः ॥१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रोद्यद्-गाम्भीर-काय-प्रति-जित सलिलाऽम्भो धरे हारहीर,
तारस्फाराब्जरोचिस्सुयशसि भवति, प्रोल्लसच्चक्षुषी मे ।
दृष्टोनेतो विधौ शं वृषभजिनपते, गन्धिमालोलभृङ्ग-
ज्झङ्काराऽऽराव-सारा-मल-दल-कमला-गार-भूमी-निवासे ॥१४॥

संसाराऽपार पाथो-निधि-पुलिनमहो, प्राप्तुकामा यदिस्व-
श्रीमत्तीर्थादिकर्तुः क्रमणकजयुगं, तस्य संसेवतोच्चैः ।
गात्रे यस्य प्रवेशं वरगुणततय-श्चक्रिते-विश्व-पूज्ये,
च्छाया-सम्भार-सारे वरकमलकरे तार-हाराऽभिरामे ॥१५॥

श्रीमत्तीर्थाधिनाथा-ननवर-कमला-वासिनी-प्राज्ञ-चेतो,
ऽभीष्टे डिण्डीर-पिण्डो-ज्ज्वल-तनु-लतिके, देवदेवी-स्तुताध्रेः ।
नम्रीभूतेन्द्रमाले विहित-सुखशते, पूर्ण-चन्द्रैक-वक्त्रे,
वाणी-सन्दोह-देहे भवविरहवरं, देहि मे देवि! सारम् ॥१६॥

इत्थङ्कारमहं बृहत्खरतरा-नि स्वच्छ-गच्छाधिप,
श्रीमच्छ्रीजिनचन्द्रसूरिचरणा,-ऽम्भोजन्मरोलम्बवत् ।
प्रद्युम्नेषु-पयोधि-काय-पृथिवी, संवत्सरस्यास्पदेषु,
तुष्टा-वेष्ट-समृद्धते सुमति-युक्कलोल-आदिप्रभुम् ॥१७॥

२८

[ मदाक्रान्तावृत्तम् ]

सिद्धिक्षेत्रं पदमिदमिति प्राप्तपुष्टप्रतिष्ठं
जीयादेतत्त्रिजगति गतं क्वापि नैतत्प्रभुत्वम् ।
तेन स्तुत्यः स्तुतिपदपदैर्योऽस्ति सिद्धार्थसिध्यै,
तं स्तौमि त्वां विमलगिरिराट् दर्शनोदारबीजम् ॥१॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्यावश्यं श्रवणसुभगं नाममन्त्रं सकर्णाः
श्रावं श्रावं विमलमहिमं निर्विषं स्वात्मरूपम् ।
कुर्वन्त्युच्चैर्गुणपदभवद् भावनाभावनाभिः,
सेवे शत्रुञ्जयगिरिममुं कर्ममर्मारिजैत्रम् ॥२॥

इन्द्रोपेन्द्राद्यतिरसकृताऽर्हाऽर्हणाऽरीणमूर्त्ति-,
स्फूर्त्यैवाशु व्यपहृतजगत्पापतापप्रपातः ।
आधिव्याधिज्वरदरगराऽरिप्रपंचप्रवासी,
श्रेयः श्रीणां प्रकटनपरः स्तात् सतां सिद्धराजः ॥३॥

सर्वार्हद्भिः स्तुतनतमतं चाभवत् सिद्धिसिध्द्यै,
यत्राऽवश्यं कुगतिभयभिद्धातमात्रं त्रिलोक्याम् ।
चिन्तामण्याद्यधिकफलदं विश्वशुद्धिप्रकाशं,
सिद्धक्षेत्रं दिशतु तदिदं सिद्धिसौधाधिवासम् ॥४॥

अस्मिन् सिद्धाचलभुवि पुरा सर्वतः सर्वदेशे,
सिद्धाः सिद्धाः शरदशभिदानन्तशो ये च भव्याः ।
सेत्स्यन्त्यत्राद्भुतगुणगणे तानहं साधु सेवे,
शश्वद्भावैः सुखपदमिदं वन्दनं भाविनां यत् ॥५॥

तिर्यञ्चोऽपि प्रशमितरुषस्त्यक्तजातिस्वभावा,
लब्धा दिव्यावतरणपदं प्राप्तसौख्यप्रकर्षाः ।
यत्रामात्रा प्रतिहतगुणाः का कथा मानुषाणां,
तं श्रीमन्तं विमलमचलं साधुशुद्ध्यै प्रपद्ये ॥६॥

श्रेयःश्रेणीप्रसव इव लसत्सम्पदो-दारकन्दः,
सत्त्वालीनामिव सुखकलाचार्मकश्रीरिवास्ते ।
साक्षाद्भास्वानिव शिवपथोद्द्योतने कोविदाना,-
मुत्प्रेक्षैवं स्फुरति हृदये प्रेक्ष्य शत्रुञ्जयाद्रिम् ॥७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रज्ञा-ज्ञानं चरणकरणं दर्शनानां प्रमुख्यं,
योगाः सर्वे व्रततततपस्त्विप्तिभावप्रभावाः ।
त्वय्यासन्ने विपुलसफलानन्तवीर्यप्रवादाः,
सम्पद्यन्ते सुभग-गरिमागारसिद्धाचलेन्द्र ॥८॥

यस्मिन् दृष्टे विकटनिकटस्थायिनोऽनन्तदुःखो,-
त्पादे दक्षाः सुविपुलखलाः कर्ममर्मादिरूपाः ।
नश्यन्त्येते परिकरधरावैरिपूराः समूला,-
स्तेनेव स्याज्जगति विततं नाम शत्रुञ्जयस्य ॥९॥

राजादन्या सरस सुभग स्थापयाऽर्हन्मुखानां,
वैयावृत्त्यं स्वयमुपकृतं यत्र तेनेव मन्ये ।
पूज्या जाता जयति जगतां सिद्धराजे स्थिता सा,
प्रोच्चैःसङ्घः प्रथयति गुणित्वाख्यया वन्द्यभावम् ॥१०॥

संसारामप्रमयनिरतं भेषजं दोषराग,-
द्वेषोन्मादज्वरहरवरं तथ्यपथ्यं त्रिलोक्याः ।
तापव्यापप्रशमनसुधाकुण्डमुद्दण्डलीला,
दण्डं श्रीणां विमलमचलं भावयेऽलं मुदोत्कः ॥११॥

यन्माहात्म्यं प्रकटयति सत्संसदि श्रीयुगादि,-
र्यत्सेवायां स्वयमविरतत्वेन विद्यानवद्यः ।
मोक्षद्वारं यदसममहो सेविनामाह्वयानः,
केषां न स्याद्विमलगिरिराट् कामितार्थप्रदोऽसौ ॥१२॥

सिद्धक्षेत्रे विततमतिभिर्दृष्टिदृष्टे सतीष्टे,
दीप्रे भावप्रकटनपदे दुर्गतिद्वैतबाधः ।
सम्पद्येत स्वयमपि पुनर्मानुषस्वर्गमोक्ष,-
श्रेयः सौख्योदय इह सतां दर्शनं सम्पदे स्यात् ॥१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चिन्तामण्यादय इह फलैरैहिकैः किञ्चिदासन्,
दातृत्वाख्यास्त्वयि तु सततं शैलमौले प्रसर्पेत् ।
नानानन्तातुलफलकलादानशक्तिप्रभावः,
किं तच्चित्रं ननु सुगुरवः सर्वशक्तिप्रयुक्ताः ॥१४॥

सद्भिः सेव्यः सुगुरुरिति या ख्यातिरास्ते यथार्था,
चक्रे सैवं विमलगिरिणा भावना भावितानाम् ।
एतत्तीर्थोत्तम गुरुधियामिष्टशिष्टार्थदानैः,
सर्वं युक्तं सततसफलाः सेविनां स्युर्महान्तः ॥१५॥

स्मारं स्मारं विशदशिवदं रूपरूपं तवात्म,-
स्वान्तं पूतं नयनसुभगच्छायशृङ्गप्रसङ्गम् ।
कारं कारं त्वयि नुतिरतं शैलवाक्कायशुद्धि,
कुर्वे सन्तः खलु परिचितास्तान्तिशान्त्यै प्रसन्नाः ॥१६॥

सौभाग्यं तेऽनुपम महिमारम्यमान्याः क्षमः कः,
शक्त्या वक्तुं शिखरिमुकुट त्वद्गुणध्यानधन्याः ।
सम्पत्प्राप्ति भवभयभिदं भाग्यसौभाग्यभोगं,
लब्ध्वा हृष्टप्रकृतय इहानन्दकन्दा हि सन्तः ॥१७॥

वन्दे शत्रुञ्जयगिरिवरं विश्वसम्पद्विलासं
श्रेयः श्रीणां ललनसदनं ब्रह्मलक्ष्मीविनोदम् ।
कर्मारीणां सरसविजयस्तम्भमिष्टघुरत्नं,
सद्बोहित्थं भवभयजले सर्वसिद्धिप्रसिद्धिम् ॥१८॥

इत्यानन्दमहोदयोज्ज्वलकलालीलाविलासान्वितः,
श्रीशत्रुञ्जयनामतीर्थशिखरी सौभाग्यचूडामणिः ।
त्रैलोक्योदितहर्षहर्षविनयश्रीसूरितप्रौढिमं,
बोधिं मे विदधातु कामितफलं श्रीधर्महंसश्रियम् ॥१९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ऋषभजिनेन्द्रस्तवनम्

[ स्रग्धरावृत्तम् ]

हर्षोत्कर्षप्रणभ्र त्रैदशपति-शिरः,-स्फारकोटीरकोटी-
स्फूर्जन्माणिक्यमाला शुचिरुचिलहरी, धौतपादारविन्दम् ।
कल्याणाङ्कूरपूर प्रकटन पटुता, पुष्करावर्त्त तोयम्,
वन्दे देवाधिदेवं प्रथमजिनमिनं, चीन निर्गिक्र(?) सुभक्त्या ॥१॥

शार्दूलविक्रिडितम्

नाम्ना नौ वृषभत्व केऽपि विभुतां, ते देहि मे त्वद् गुणै-
रीणस्य श्रितवत्सलोऽस्यमि तस,-च्छक्तित्ववाँस्त्वं यतः ।
तेनार्थित्वमितस्त्वयीति तनुते, यस्यांह्रि लक्ष्मोपधेः,
सेवा मोक्ष वरश्रिये स वृषभो, भक्तार्ति हर्ता सताम् ॥२॥

योगीन्द्रा अपि ते गुणान् कथमलं, वक्तुं न तेषु प्रभुः,
स्तोतुं स्यात्तदहो तथाऽपि न लघु,-मत्तुच्छनुत्या स्तुतः ।
नैतः सेन वनस्थितोऽपि रवणो, नेभः कृतेतिः,
स्नातस्याऽप्रतिमस्य मेरु शिखरे, शच्या विभोः शैशवे ॥३॥

श्रीमन्नाभि-नरेश-वंशज विभो !, व्याख्यान-भूम्यासने,
स्थास्नुं मूर्तिचतुष्टयीं तव पृथग्, रूपां न मे मे मनाक् ।
यत्पर्षज्जनतोचितं तदनया भूतं यतत्तेपते,
रूपा-लोकन-विस्मया-हृतरस-भ्रान्त्या भ्रमच्चक्षुषा ॥४॥

सोऽस्तु श्री वृषभ प्रभुर्भव-भृतां भूत्यै यदङ्गं पुरा,
दिव्यासन्युपवेश्य सौवत भुज, स्नेहेन चीनाङ्कुशैः ।
स्नानार्थं मरुदेवयाऽसकृदहो, हर्षोद्धताङ्गया स्वयम्,
उन्मृष्टं नयनप्रभा-धवलितं, क्षीरोदकाशङ्कया ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इन्द्रोपेन्द्रमुनीन्द्र चक्रि-प्रमुखै रत्यद्भुत व्यक्तिकैः,
स्तुत्यार्थोऽपि यथार्थ सद्गुणगणो भक्तिरितान्तः कृते ।
गङ्गापूर इवान्तरैक सरसः, किं नो पुनीतेऽत्र मे,
वक्त्रं यस्य पुनः पुनः स जयति श्रीवर्द्धमानोजिनः ॥६॥

श्रीमानादिजिनः श्रियेऽस्तु स वृषो, लक्ष्मीपथेर्यत्पुरो,
विज्ञप्तिं कुरुते किमित्यनुदिनं, षण्ढात्फलं सेवितात् ।
त्वं नुक्षत्य सुखप्रदो हि भवता, मुक्ता इवाङ्घ्रिर्जने,
हंसां साहृत-पद्म-रेणु-कपिश,-क्षीरार्णवाम्भोभृतैः ॥७॥

नेतस्त्वावक पावकोज्ज्वलगुण,-श्रेणी-मनन्ता क्षमा,
वक्तुं योगिवशः कथं स्व वचसा, त्वं वाङ्मनो लक्ष्यताम् ।
प्राप्तो यत्कलयन्महार्णवजले, यत्नं नु किं कः प्रभुः,
कुम्भैरप्सरसां पयोधर-भर-प्रस्पर्द्धिभिः काञ्चनैः ॥८॥

स्वामिस्त्वद्दूर-भक्ति योग-वशतो, देश-प्रमत्तादिसद्,
गौण स्थान गतोत्तरोत्तर गुण, श्रेणीमिताः साम्प्रतम् ।
तद् यन्तेऽत्र सुपर्वणामविरता,-नां मुक्तिबीजं ह्यभूत् ,
येषां मन्दर-रत्न-शैल-शिखरे, जन्माऽभिषेकः कृतः ॥९॥

श्री आदीश! तवैव भक्ति त्रिभुनैश्वर्यं प्रलभ्यान्तरम् ,
ये भव्याः क्रमतश्चतुर्दश गुण,-स्थानक्रिया रोहणैः ।
सान्द्रां रुद्र-गुणावलीं शिवपदं, प्राप्य विधुत्यार्चिताम् ,
सर्वैः सर्वसुरासुरेश्वरगणै स्तेषां नतोऽहं क्रमान् ॥१०॥

[ स्रग्धरावृत्तम् ]

नानानन्तार्थभावं ह्यणुपरिणतिवत् , चिन्तितेष्टप्रवीणं,
चिन्तामण्यादिबद्धा तरणिरिव सतां, स्पष्टिता-शेष-मार्गम् ।
ज्ञानीव व्यक्त-तत्त्व-प्रकटन-पटुकं, संश्रये भक्ति युक्तै-
रर्हद्-वक्त्र-प्रसूतं गणधर-रचितं द्वादशाङ्गं विशालम् ॥११॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्रित्वं तीर्थकृत्त्वं सुरवर-विभुता, लब्धि-लब्ध-प्रकाशो,
यल्लब्ध्वा भव्यजीवैः शिवपद सपदं, प्रापि कालत्रयेऽपि ।
पञ्च त्रिंशद् गुणौघं सुहृदिजिनवहे, त्वद्वचोऽनन्त भावै-
श्चित्रंबह्वर्थं युक्तं मुनिगण-वृषभै-र्धोषितं बुद्धिमद्भिः ॥१२॥

गन्थेर्भेदं विधायो-पशमजमुख-सं,-दर्शनोत्थस्य चेतो,
निष्ठ-प्रष्ठेभ्य-भक्तेर्जिन-वच-चरणो,-पासनं शासनं ते ।
सेवन्ते पूर्व-रत्न-त्रय-चिति-विततं, भोगयोगीह येषाम्,
मोक्षाऽप्रद्वारभूतं व्रत-चरण-फलं, ज्ञेय-भाव-प्रदीपम् ॥१३॥

धर्मादि-द्रव्य-षट्कं चरण-करणगं, तच्च धर्मद्विभेदम्,
सादेशं नन्द-तत्त्वं प्रथयति यदहो, मार्गणादि-प्रपञ्चैः ।
मत्यादि ज्ञानरूपं मिथ इह जिन ! तत्, कालिकोत्कालिकं ते,
भक्त्या नित्यं प्रपद्ये श्रुतमहमखिलं सर्व-लोकैक-सारम् ॥१४॥

मन्येऽहं मुक्तिकल्पाद्भुतम-हिममयं, रूप माकर्ण्य सूनोः,
यस्योद्वाहोचिता वेक्षणविधिकलया, किं शिवं पूर्व-मग्रे ।
प्राप्तामर्वादिदेवा सविभुरिह दध-न्तं वृषाङ्कं खुराग्रै-
र्निष्पङ्क-व्योमनील-द्युतिमल-सदृशं, बालचन्द्राभ-दंष्ट्रम् ॥१५॥

चित्ते ध्यायन्ति भव्या अहमहमिकया, येऽनिशं नाम मन्त्रम्,
सिद्धान्ते सार्वं तेषां, भवजलधिरपा-रोऽप्य-भूत्राम शेषः ।
तत्तेऽतीयन्ति किं न ज्वलन-मरि-महिं-स्तेन-सिंहांबु-नागम्,
मत्तं घण्टारवेण-प्रसृत-मदजलं, पूरयन्तं समन्तात् ॥१६॥

त्वत्पादाब्ज-प्रणामै र्यदि भुवि भविनां, सम्भवन्ति क्षणेन,
यक्षैश्वर्याणि वर्याण्यपि न सुर-शिवा,-दीनि विश्वत्रयेऽपि ।
स्वामिंस्ते वन्दनार्थं सपरिकरवरैः, किं तदोको न नाका-
दारूढो दिव्यमार्गं विचरति गगने कामकः कामरूपी ॥१७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यः श्री शत्रुञ्जयाख्य क्षितिधर तिलकं, तीर्थपं मारुदेवम्,
निघ्नन् विघ्नानि कुर्वन् हितमुपनमतां, प्राणिनां शं तनोति ।
सर्वाणीष्टानि स श्री जिनचरणक्रमोपासको गोमुखाख्यो,
यक्षः सर्वानुभूतिर्दिशतु मम सदा, सर्व कार्येषु सिद्धिम् ॥१८॥

श्रीहर्ष-विनयसूरित-गुरु-हर्ष-विनय-सुधी-भिरप्यद्रौ ।
श्रित-हर्ष-विनय-सूरि श्री जय जय-हर्ष विनय-गुरो ॥१९॥

वन्दे त्वां वृषभैक हर्ष-विनय,-श्री-सूरिभं श्रीपदम्,
श्रेयो-मार्ग-विलासि-हर्ष-विनय,-श्री-सूरितं सर्वतः ।
मिथ्या ज्ञान तमस्सु हर्ष-विनय,-श्री-सूरि भेपेष्वपि,
प्रष्टाज्ञोदयदं च-हर्ष-विनय,-श्री-सूरि-पूज्य-क्रमम् ॥२०॥

इत्थङ्कार मुदारसार सरसैः, निर्णिक्त भक्त्युक्तत्वाम्,
‘ ..नृसुरादि राज्यविभवं, याचे न किन्त्वस्तु मे ।
श्री आदीश ! तवेह हर्ष विनय, श्री सूरि सेवा पदोः,
श्रेयः श्रीस्तु यया शया लयलया श्री धर्महंस श्रिया ॥२१॥

## समस्या पदास्पदं श्रीऋषभजिनेन्द्र स्तोत्रम्

[मालीनीवृत्तम्]

मतिरणुसममानामेतवादीशमेरू-
नतगुणनुतिमाप्तो दुःषमायांभवेनुः ।
क्वचिदुदितमुदा यत्प्राहिणोत्तत्किमुर्व्यां
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥१॥

तिलतुषितकुलस्था दुर्विधो स्वाङ्गजाशा-
भृदभयदतनूजं भक्तितस्ते श्रियोश ! ।
यदलभत हि काचित् स्त्रीत्यथाख्या किमासी-
त्तलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऋषभजिन ! वचस्ते वस्तु सम्यक् प्रतिष्ठं
विशदिह भविकानां तन्वतां सौवचित्ते ।
मतिरतिकुमतं किं विलष्टमेतद्वचोव-
त्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥३॥

जिनवर ! भवदीया योजना सारसारा-
मृतमयगुणखानिः शङ्करी गौर्जनानाम् ।
क्वचिदपि हि कदा किं दोषपोषं यथैषा
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥४॥

तिलतुषवदसारान् सङ्कुलान् क्वापि संस्थां-
स्तव जिन ! वचनाब्धिप्रोत्थबिन्दूद्भवाभान् ।
परसमयपथस्थान्प्रेक्ष्य नाहेति कश्चि-
त्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥५॥

समवसृतिमगुस्ते सार्वदेवा विधाय
त्रिजगदभवि नाट्यं चित्रकृद्भक्तियुक्तेः ।
मरुदथ गुरुचेताः कश्चिदित्यात्तनृत्यं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥६॥

प्रथमजिन ! तवाज्ञा भव्य ! भव्यात्मनां स्वः-
सुखलवममृतत्वं साधिना साधु दत्ते ।
तदुचितमवनत्वान्नापगाः किं गतांह-
स्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥७॥

तव जिन ! कुलजातस्यापि बुद्धौ मरीचेः
स्वपितृनतिनुतस्याऽशस्तभावाणुभूतौ ।
कुलविषयमहाप्ति वीक्ष्य नाहेति कः किं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिलतुषसमवंशेऽनार्यभूमौ क्वचित्स्थां-
स्तव जिन ! पृथुधर्माज्ञादरानेक्ष्य साक्षात् ।
अदनजसुलसादीन् केन नावाद्यथैवं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥९॥

अभयद ! भवदीयाऽचिन्त्यमाहात्म्यतश्चेत्
क्षितिपतिभुवि रङ्कः-प्रेक्ष्यतेऽन्धश्च पङ्गुः ।
गजगततितदानासम्भवीदं भवेत्किं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥१०॥

सभविक ! भविकाली सेवते ते वचो याऽ-
तृणगुणमपि धत्ते क्षीरसौष्टे क्रियासु ।
अणुलघुपदसृष्ट्या सा कथं क्वापि नीचै-
स्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥११॥

समवसरणभित्तौ यानि चित्राणि लेखा
लिलिखुरिन ! मुदा ते विस्मितं तान्यवेक्ष्य ।
बहुभिरमृततावाप्यत्र किं तेऽतिचित्रं
तिलतुषटकोणे कीटिकोष्ट्रं प्रसूता ॥१२॥

जिनवृषभ ! यथाऽन्ये तीर्थिका लीलयाहुः
शिवपदमिह तद्वत्त्वं न तेऽज्ञाः पथस्थाः
तदपि परमतं यन्म्लिष्टितार्थं यथेदं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥१३॥

समवसृतिभुवं ते प्राप्य के के न सिद्धाः
सकलक्लेशमुक्तेरक्षयक्षायिकाप्तेः ।
न भवततिमतीयुश्चित्रमत्रैक्ष्य चैवं
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥१४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिनप ! तव वधः स्यात्प(?)न्तिकास्थास्थितानां
भवति शिवरमायाः शंनिधेः किं न हिंसाम् ।
प्रतिकृतिविहितान्त्या भाविनीं निर्ज्जितांह
स्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥१५॥

द्वयमनुपसमेतत् सम्प्रतीमो द्वयस्या-
भयद ! वरपरीक्षाप्रेक्षकाः सत्यवाक् त्वम् ।
त्वयि वितथपथेनार्थादरान्येष्विदंव-
त्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥१६॥

तव मतिविपरीताः कल्पतर्हिंसादिदोषा
जिन ! परसमयास्ते सर्वचिन्मूलतोऽस्थाः ।
यदि परगिरिमान्याः किं तदेतन्न मिथ्या
तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥१७॥

परसमयरतस्था लक्षशः कोटिशो वा
जिनप ! जपतपो वोपासतां योगमार्गम् ।
तदपि शिवपथेनायान्त्यदोऽर्थे यथाऽज्ञा-
स्तिलतुषतकोणे कीटिकोष्ट्रं प्रसूता ॥१८॥

यदृजुहतमतिस्थैरुक्तमन्यैरयुक्तं
तदरमितरथाऽत्राकारि शिष्यप्रशिष्यैः ।
वचसि हतिरियं तेऽभून्नष्ट्रं रेरिवास्मि-
स्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥१९॥

भविकततिमियन्ती कार्मणानन्तकाणु-
स्थितिभृतिमति सौवत्वेऽपि कैवल्यसूचिम् ।
वदति तव सुक्ष्मध्यानजां प्रेक्ष्य कश्चि-
त्तिलतुषतटकोणे कीटिकोष्ट्रं प्रसूता ॥२०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्थं श्रीगुरुपूज्यहर्षविनयश्रीसूरितः संस्तुतिं
भक्तिव्यक्तितया ममेश विमलादीन्द्रश्रियां मण्डनम् !
त्वं संयच्छ भवे भवे भवभवं बोधिं सुबोध्याङ्कुरं
दिव्यानन्ददधर्महंसललनाव्जप्राज्यराज्यश्रियम् ॥२१॥

श्रीऋषभजिनेन्द्रतस्तवनम्

[ शार्दूलविक्रीडितम् ]

श्रीशत्रुञ्जयशैलभासुरशिरः श्रृंगारचूडामणे, !
श्रीनाभेय ! जगन्मनाऽम्बुजवनप्रह्लादनाहर्मणे !
रम्यां सिद्धिवधूं बुवूर्षुरखिलं पापं जिहीर्षुर्निजम् ,
त्वामज्ञोऽपि निनीषुरस्मि भगवन् ! मार्गं गिरां किञ्चन ॥१॥

भाग्यैरुत्पलमण्डलैरिव जगद्भर्त्तः ! समुन्मीलितम् ,
प्रोढप्राच्यभवार्जितैर्मुकुलितं पापैः सरोजैरिव ।
आनन्दाम्बुधिना च मेऽद्य भगवन् ! कल्लोललीलायितम् ,
त्वद्वक्त्रामलचन्द्रमण्डललसद्भामण्डलेक्षोत्सवे ॥२॥

त्वद्यात्रागत-देहिनां गजपतेः स्कन्धाधिरूढा सती,
त्वन्मातेव समग्रपापपटलं बेभिद्यते प्रागपि ।
तेन त्वं जगतां पते ! किल कलप्रासादमध्यस्थितो,
ध्यानासीन इवेक्ष्यसे विगततच्चिन्ताचयः प्राणिभिः ॥३॥

चेतश्चिन्तितदानदैवततरूः श्री श्रीकपर्दीश्वर-
स्त्वद्यक्षाधिप एव देव ! सकलान् विघ्नान्निजेध्नीयते ।
यत्प्रागेव समग्रयात्रिकजनव्रातस्य रात्रिंदिवम् ,
तद्व्यापारविधौ समस्तु भगवंस्तत्तो कुतस्त्यः श्रमः ? ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वत्प्रासादशिरोऽधिरुह्य भगवन् ! दौकूल एष ध्वजः
प्रान्ताञ्चितकिङ्किणीक्वणनिभाद् ब्रूते किलैतद्वचः
हे लोका ! यदि सिद्धिनामकपुरीं द्रष्टुं समुत्कण्ठते
चेतस्तत्तदधीश्वरं जिनममुं सेवध्वमत्यादरात् ॥५॥

स्वामिंस्ते गगनाग्रलग्नशिखरः प्रासाद एव ध्रुवम्,
हन्तुं पापभटानतीव विकटान् यद् गाढबद्धोद्यमः।
दण्डं चण्डममुं बिभर्ति तदयं तत्खण्डनायोत्कटम्,
तद्बन्धाय च पाशमप्यतिलसल्लम्बध्वजव्याजतः ॥६॥

देव ! त्वन्मुखवीक्षणक्षणभवद्रोमाञ्चसंवर्मित-
त्रैलोक्योत्कटरागमुख्यसुभटान् शत्रून् यदत्राङ्गभृत्।
ध्यानास्त्रेण जयत्यहर्निशमतः शत्रुञ्जयेत्याख्यया
विख्यातस्तव भूधरोऽपि भगवन् ! लोकाग्रचूडामणे ! ॥७॥

श्रीधर्मोज्ज्वलनैकमण्डलमिलन्मानातिग प्राणिनाम्,
माद्यद्दुष्कृतमंडलकुलमिव क्रीडत्कुरङ्गावलेः।
मन्ये त्रासयितुं त्वदीयभवनद्वाराङ्गणे रङ्गतो,
व्याघ्रीयं स्थितिमादधाति सकलप्राचीनबर्हिःस्तुत ! ॥८॥

राष्ट्राणि प्रचुराण्यपीह भुवने जाग्रत्युदग्रश्रिया,
नैकस्यापि परं सुशब्दघटना प्राग् जाघटीति प्रभो !
किन्त्वेतज्जगदद्भुतां सुभगताल्क्ष्मी समासीसदत्,
त्रैलोक्याभरणेन देव ! भवता ख्यातं सुराष्ट्रेत्यतः ॥९॥

स्वामिंस्त्वन्मुखमण्डलोल्लसितरुक्पूरैः प्रभातोदये,
स्पृष्टा ये नहि दुर्गतिं स्पृशति तान् वन्दारुजन्तूनिह।
येनोद्यत्प्रबल-प्रतापतपनोदीप्रप्रभाचक्रकैः
श्लिष्टाः श्लिष्यति तान् किमञ्जनघनश्यामा तमिस्रावली॥१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्ये सिद्धरसः प्रसिद्धमहिमा स्वामिंस्त्वदीयोल्लस-
त्पादाम्भोरुहसम्भवद्दशनखश्रेणीस्रवत्त्विषां मण्डलम् ।
यत्स्पृष्टाः किल कोटिशोऽपि मनुजाःकल्याणलक्ष्मीं नवा-
मासाद्याभरणीभवन्ति भगवन् । सिद्धयङ्गनाया यतः ॥११॥

पीयुषद्रववर्षणं नयनयोस्त्वद्वक्त्रसंवीक्षणम्,
सञ्जातं प्रकरोति देव ! भगवन् ! भाग्योत्तमत्वं मयि ।
किं नोल्लासयति प्रकाशितजगच्चित्तो वसन्तोत्सवः,
क्रीडत्कोकिलमण्डलीषु मधुरारावस्य लीलायितम् ॥१२॥

नान्यो रत्नमहीधरोऽस्ति भुवने सोऽप्यस्तु वा किं सता,
तेन प्रस्तरखण्डमण्डितभुवा रत्नाचलः किन्त्वयम् ।
ख्यातस्ते धरणीधरः प्रविलसन् यत्रैष चिन्तामणि-
स्त्वं नाथ ! प्रथयस्यभीष्टमखिलं कालेऽधुनाप्यङ्गिनाम् ॥१३॥

कीर्त्तिस्तम्भयुगं पदौ विजयिनौ धर्मस्य कल्पद्रुमौ,
पाणी तत्सरलाङ्गुलीततिरियं स्वःशाखिनां पल्लवाः ।
स्कन्धौ बन्धुरशातकुम्भकलशौ सौवर्णपट्टोहि हृत् ,
कण्ठः कम्बुरयं स्वशब्दविधिना विश्वस्य कल्याणकृत् ॥१४॥

चन्द्रः सान्द्ररुचिर्मुखं नयनयोर्युग्मं नवाम्भोरुहम्,
कर्णौ काञ्चन शुक्तिके मुकुरयोर्द्वन्द्वं कपोलस्थली ।
नाशाम्भोरुहनालमद्भुतमिति त्वद्रूपलक्ष्मीं प्रभो !
प्रातर्मङ्गलकारिणीं प्रतिदिनं पश्यन्ति धन्या जनाः ॥१५॥

कालेऽस्मिन् भवसम्भवश्रमभरैरापीड्यमानाङ्गिनाम्,
स्वामिंस्त्वं निजदर्शनामृतरसैरानन्दनिस्यन्दिभिः ।
तापव्यापमपाकरोषि सकलं वीक्ष्येति भूमण्डलात्
स्वः पातालतले सुधाप्यचकलन्नितुर्हैकावस्थितिम् ॥१६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वं भक्तिप्रणमन्नरासुरसुराधीशाच्यमानः प्रभो !
तापं खण्डयसि प्रचण्डमपि यज्ज,डयं च जन्मस्पृशाम्
तस्मात् तद्घटने पटुत्वकमलामालिङ्गमाना विभौ
सूर्याचन्द्रमसौ त्वदीयतुलनामासादयेतां कथम् ॥१७॥

रत्नालङ्कृतिभारिणी नयनयोर्नव्यामृतो-द्गारिणी
माद्यन्मोहविदारिणी स्फुरदुरुज्योतिः कलाधारिणी ।
स्फूर्जन्मङ्गलकारिणी त्रिजगतामानन्द-विस्तारिणी
मूर्तिस्तेऽघनिवारिणी जिनपते ! दत्तो मनोवाञ्छितम् ॥१८॥

रम्योऽशोकतरुः स्फुरत्परिमलाकृष्टालिमाला--कुला ।
वृष्टिः सौमनसी सुरैर्विरचिता दिव्यो ध्वनिर्बन्धुरः ।
चञ्चच्चामरमंडलं स्फुरदुरुश्वेतातपत्रत्रयी
भास्वद्रत्नगणाऽनणुद्युतिभरैराभासि सिंहासनम् ॥१९॥

व्योमन्यब्द इवातिमन्द्रमधुरध्वानो नदन् दुन्दुभि-
मार्तण्डद्युतिमण्डलाभममलं भामण्डलं चाद्भुतम् ।
इत्येतां भुवनेषु विस्मयकरीं त्वत्प्रातिहार्यश्रियम् ।
दृष्ट्वा कस्य जगन्नमस्य ! न भवेत् प्रौढप्रमोदोदयः ॥२०॥

श्रीमन्नाभेयदेव ! प्रथमजिन ! जगन्मामसाम्भोजहंस !
प्रौढश्रीपुण्डरीकाचलविमलतरोत्तुङ्गशृङ्गावतंस !
एतां यस्तावकीनस्तुतिकुसुमस्रजं स्थापयेत् कण्ठपीठे ।
सोत्कण्ठा सम्पदस्तं त्रिजगदधिपते ! वृण्वते विश्वशस्याः ॥२१॥

## ऋषभजिनेन्द्रस्तवनम्

[ स्रग्धरावृत्तम् ]

वन्दे श्रीआदिदेवं तमणुतममतिं स्तोतुमुद्धायमिन्द्रा-
दीनां षट्तर्करूपां समयपथपुरं युक्तिपाथोधिवीचिम्
सर्वार्थावायशैलश्रियमयि निपुणाः प्रेक्ष्य केनैवमूचुः
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वामिंस्ते पल्यकूपोपममभितगमैर्द्रव्यषट्कं पराणौ
गिर्यास्ते द्वादशाङ्गं शिवपदनगरं तत्र नैकोक्तियुक्तिः।
वार्द्धीयेतात्र शैलत्यमणुगुणगणः स्थैर्यतश्चेत्तदाऽभूत्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्रव ।र्द्धिस्ततोऽद्रिः ॥२॥

सूक्ष्म ! त्वद्देशनायां भवितितिरिन ! षड्दर्शनागाधकूप-
स्थौ रूप पूरिवार्थैः पृथुसमयपथाम्भोधिभेजेव लभ्या।
प्रत्येकं स्थैर्यशैलं जिनमतमृतं यत्ततोऽदः पदं किं
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥३॥

सूक्ष्म ! त्वच्छासनश्रीस्थितमतुल्तपः षड्विधं बाह्यतो वा-
ऽऽभ्यन्तर्यात्पूर्णकूपोऽज्वलमलमलमधिपाराध्यसिद्धिं न केऽगुः।
श्रद्धाद्दङ्गंशमाब्धिप्रबलहृदचलं चेत्ततो नेति किं स्या,-
त्सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्तछोऽद्रिः ॥४॥

यत्तज्जीवात्मवादाः परमतिन इनानन्तसह्यत्वमाख्यो
दोषं षड्जीवकायं स्वगिरिगुणदया गाहकूपस्वरूपम्।
यच्छ्रेयः श्रीपुराभं सुपदजलनिधिं धैर्यशैलं ततोऽभूत्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥५॥

नेतस्त्वद्गीभवाज्ञाप्रमितिरमृतदानान्यतीर्थ्याप्तजोक्ति,-
स्तन्वी जात्विष्टशंकृत् षडसुवधमहाकूपरूपोरुदङ्गं।
दुष्टार्थानां च दुःखाम्बुधिरधिकहठाद्रिर्वदेवेति सम्यक्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥६॥

शश्वद्देहाद्ययोगैः द्वीवपदमुपदेष्टृत्वमङ्गादियोगा,-
दन्योन्यस्पर्द्धवोचुः परसमयगिरः स्वाधिदेवेषु यत्तत्।
सिद्धे स्यात्किन्तु तेऽर्हत् स्वसमयरचनेऽत्र्यधीरेतदर्थे
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिन्दन्तूच्चैः सृजन्तु स्वयमुत जगतीं यत्तदुक्त्या स्वपुष्प-
प्रायोदन्तस्वरूपाः परसमयपथाधीश्वराः किन्तु नेतः ।
त्वन्निष्टिप्रोपदेशे शिवपथि कृपणा दुर्धियोऽर्थे यथास्मिन्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥८॥

सार्वास्यन्ते प्रसन्नं प्रशमरसभरं दृग्युगं सुश्लथं सत्,
पर्यङ्कास्थानसंस्थङ्करमुखमखिलं रागरोषादिवन्ध्यम् ।
मुद्रानाशेक्षितेऽन्यैः पतिभिरियमयोदम्पदार्थो यथाऽज्ञैः
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥९॥

यत्सम्यक्त्वात्प्रतीमः शिवदमनुपमं त्वादृशामाप्तभावं,
तस्मै ते शासनायामितकुमतमहापाशहर्त्रे नमोऽस्तु ।
पश्यामः सत्यभावं किमपि परमते नैतदर्थे यथाऽज्ञाः
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥१०॥

भव्यानां मोक्षसिद्ध्यै त्वदुदितचरणश्रीतटे षड्व्रतोष्टे
कूपारोपागुणौघैर्नगरितसकलादेशभङ्गीमयोक्तिः ।
षट्कायाराधनाब्धिः सदवहितमनोद्रिस्ततोऽदो भवत्किं
सूच्यग्रे कूपषटकं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥११॥

हेयादेयत्वतस्ते गिरि जिन ! भविनां बोधनायाविरासीत्
षट्सिद्धान्तीह कूपप्रतिकृतिरखिलार्थाम्बुभिर्युक्तिदङ्गा ।
सम्बन्धाब्धिः स्वतीर्थाधिपतिसदचलस्तेन जज्ञे किमेवं
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥१२॥

भर्त्तस्ते द्वादशाङ्गीमयगिरि परितः षड्रसीकूपरूपा
दिव्यास्वादेन भव्योपकृतिकृतिपराऽजन्यसौ सत्यदङ्गा ।
सौख्यानन्त्याब्धिरुच्चैः शिवपदमहिमाद्रिः किमेवं ततोऽभूत्,
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥१३॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीवीरस्य प्रशस्यश्रमणपरिवृतस्याग्रतो लास्यपूजां
कृत्वा सूर्याभदेवः सुलभशिवपदं सन्तनोति स्म यद्वत् ।
तद्वत् कश्चित्सुरस्ते पुर इन! तनुते किं न नृत्यं तदेतत्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥१४॥

सिद्ध्यै ध्यायाम्यहं ते समवसृतिमहादुर्गभित्तिस्वरूपं,
याता यास्यन्ति जग्मुः शिवपदपदवीं वीक्ष्य यत्रैकभव्याः ।
चित्रैश्चित्रैर्विचित्रं यदखिलसुखदं चाजनीदं यथास्मिन्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥१५॥

भिन्नां भर्त्तः समूलं निजपरविषयां तीक्ष्णसंसारसंस्थां,
षड्लेश्याकूपरूपां समविषमभवश्रेणिहृङ्गां त्वयेमाम् ।
दुष्टाऽचारवार्द्धि कुमतहठगिरिं वीक्ष्य नापूरि कोदः
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥१६॥

सूक्ष्माचाराच्र्ये सर्वेतरविरतितटे ते षडावश्यकश्रीः
कूपारोपाधिपास्ते शुचिपदसुरसैः सम्पदर्थादिहृङ्गम् ।
सूत्रालापादिपाठोऽम्बुधिरवहिततेहाचलश्चेन्न किं तत्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥१७॥

पूज्या त्वच्छासनश्रीः परसमयगिरो नार्थतथ्या यदासां
षड्भाषा अप्रशस्ताः पृथुभवपथदाः कूपरूपाः पुराख्याः ।
दौर्गत्यादेरनर्थाब्धय इह कुहठाद्युन्नतास्तेन जज्ञे
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥१८॥

मोक्षस्त्वय्येव नैवानुचितपरसुरेष्वाप्तताधीनिधीनां,
यत् द्विट् षड्वर्गकूपाः कुपथरसगता दुर्धियोऽसत्यहृङ्गाः ।
हिंसाः कर्माब्धयोऽमूः प्रतिभवमवचत्वाद्रयः किं न तत् स्यात्
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥१९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वत्माहात्म्येन मुक्तासहनमतिमता नित्यवैरा अपीयु-
यौ दृष्टाः पर्युपास्यैर्वृषभजिन ! भवद्देशनाभूमिमीडे ।
तां दुष्प्रापां परेषां निखिलसुखखनिं शिष्टमेतद्यथार्थैः
सूच्यग्रे कूपषट्कं तदुपरि नगरं तत्र वार्द्धिस्ततोऽद्रिः ॥२०॥

इत्थं चन्द्रगणेन्द्रहर्षविनयश्रीसूरिराड्येश्वरः,
स्तोत्रं मन्त्रपवित्रगोत्रमहिमाम्नायार्णवः प्रापितः ।
श्रीशत्रुञ्जयमौलिमण्डनमणेरीणप्रवीणोदयं,
देहि त्वं गुरुधर्महंससहसक्रीडाब्ज ! मे श्रीपदम् ॥२१॥

## श्री ऋषभजिनेन्द्र स्तोत्रम्

[ शार्दूलविक्रीडितम् ]

यस्या सस्थलशालिनः किल तनोः श्रेयोलतानंतवो
मूर्त्ताः किं त्रिजगत्परोपकृतये तापापनोदाय वा ।
तत्तत्सौख्यफलोद्भवाय भुवि वा प्राविर्बभूवुर्जटा-
कूटेनेव पदूद्भटं समयिशं दद्याद्युगादिर्जिनः ॥१॥

यस्योच्चांसतटे जटाकपटतो नीलोत्पलश्यामला
धूमाली प्रसरीसरोति सुतपोध्यानाग्निभिर्ज्वालिते ।
किं कर्मेन्धनसञ्चये सति महासद्भाववातोद्धतैः
स श्रीमान् वृषभप्रभुर्भवतु मे सद्भूतसद्भूतये ॥२॥

शस्योत्पत्तिपराः सुसंवरधरास्तापापहाः शङ्करा
युष्मद्द्वयमप्यहो त्वथ चलत्वं नः पुनर्जन्मनाम् ।
दूरात्त्याजयतेति विज्ञपयतीव द्वादशाभ्रावली
यं नाथं सुजयंगभृत् स शिवदः स्तादादिदेवः सताम् ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यच्छीर्षोष्णीषपीठासनवसनरता भङ्गसौभाग्यभाग्य-
श्रीकान्तामौलिवेल्लद्विरलितकबरीद्वैतमद्वैतशोभम् ।
भेजे पार्श्वद्वयेऽपि प्रसभमुभकलालम्बिलम्बज्जटायाः
कूटेनेवादिदेवः स विभुरभविता भाविताना तनोतु ॥४॥

याता यास्यंति यान्त्यक्षयसुखमिह ये तेऽर्हदास्याब्जजोद्य,-
द्वाणी किञ्जल्ककल्कास्वदनकृतिरतानान्यजैरेणुभावैः ।
तत्त्वं ज्ञात्वेति मुक्त्वा तदथ मधुकरश्रेण्यदोऽर्थं जटाङ्गं
धृत्वोपास्ते किमेतां कलयतु सकला शङ्कलां श्रीयुगादिः ॥५॥

दिव्यश्रीद्वादशाङ्गीपुरिसुगुणमणीश्रेण्यरीणानणीयः
सौधोदात्तैकसर्वेतरविरतियुगद्वारकोद्घाटशिष्टे ।
पार्श्वद्वैते जटायाः कपटत इव किं कुञ्चिके यस्य भात,-
स्तन्यान्न्यायाध्वगानामसमसमशिवश्रीपदब्रह्म नोऽर्हन् ॥६॥

तीक्ष्णोष्णश्च खरः पिता मदनुजः कीनाशनाम्ना द्विधा,
कृष्णाहं प्लवनागताम्र(?)निघसैस्तद्व्यभावेन माम् ।
विश्वस्तुत्य पवित्रयात्मवदिति स्वार्थाप्तये यं श्रयेत्
कालिन्दीवजटाङ्गसंधृतिरता सोऽर्हन् श्रिये स्तात्सताम् ॥७॥

देवाभासतयावयोरनुचितं स्प्रष्टुं हरादीन् सुरान्
नष्टाऽष्टादशदोषतादिभगवद्भावार्थतेऽष्टैर्गुणैः ।
एषोऽर्हन्नुचितस्तु नाविति हृदास्थायां ससंसज्जटा-
कूटात्किवरणस्त्रजे जिनशिवश्रीकान्तयोः स्वप्रभौ ॥८॥

भाग्याभोगतया स्वयं सहवृते ज्ञानादिकश्रीत्रिके
न्यक्षक्षायिकभावगे क्षपककश्रेणीमणीमण्डपे ।
तन्वत्यद्भुतयत्पुरे विधिरिवापूर्वप्रवेशं जटा-
व्याजात्तोरणवल्लरीं व्यरचयत्स श्रीजिनः पातु नः ॥९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्मोन्मूलननिर्मलाच्छमकलाकेलेर्लयैकालया,-
यद्ध्यानाद्बहिरेष किं प्रकटितः साक्षाज्जटालक्षतः ।
सम्यग्ज्ञानसमुत्थनिःस्पृहमतिः सद्वै रागक्षयो
लक्ष्यः शान्तरसः शिवाय स जिनः पायादपायाज्जनान् ॥१०॥

पश्यामः किल निर्विकारसरसा निर्णिक्तभक्तीरिताः
सेवन्ते भुवि के स्वनाथमथ तान् सर्वान् वृणीमो वयम् ।
इत्यालोकनहेतुतः किमु जटारूपं विधायाऽध्यगु,-
स्तत्तत्सिद्धिसमृद्धयः स्वयमिनं यं स श्रिये स्ताज्जिनः ॥११॥

पञ्चाचारवसुप्रसूमयमहाहर्म्याश्रमी यत्पुरे
संवेगोपशमव्रतैः परिवृतः श्रीधर्मसम्राट् स्वयम ।
जग्राह स्वशयद्वयेऽसियुगलीं सर्वाघसेनाभिदे
स्कन्धद्वन्द्वजटानुषङ्गमिषतः सोऽर्हन्नतानन्ददः ॥१२॥

ज्ञानं स्यात्सत्क्रियाभिर्विरहितमफलं सत्क्रियाज्ञानशून्या-
स्तद्द्वन्द्व्यास्ततो नावमितचिलरसं मैत्र्यमन्योन्यमस्तु ।
सम्यग्ज्ञानक्रियाभ्यामिति हृदयधिया यज्जटाच्छद्मनाभ्यां
सख्याङ्गुल्यो मिथः किं ततयुतविहिते सोऽस्तु देवो मुदे वः ॥१३॥

साध्यांऽसः शुशुभेऽतिशोभिजटयाः यः कज्जलस्निग्धया
पूर्वं लालनपालनाकलनया सम्भुक्तसर्वस्वया ।
लीलोपेक्षितयाथ राज्यरमया निर्मुक्तबाष्पच्छटा-
श्रेण्येवायतया नतेषु स जिनस्तन्यान्दमन्दां मुदम् ॥१४॥

यत्कल्याणमयाङ्गमेरुशिखरे सच्छायताच्छच्छवि-
र्विश्वे सर्वजनीनतेहितफला स्वर्गापवर्गप्रदा ।
भव्यानन्तसुखाय कल्पलतिका पूर्वावतीर्णेव स,-
द्वन्द्वार्हज्जटोपधेः स महिमा सार्वः स सर्वश्रिये ॥१५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संसारस्फार एषः खलु जलधिरिहानन्तजन्मान्तदुःखा-
न्यर्णासीहोग्रनक्राः कटुकफलभवास्तज्जटाकूटतोयम् ।
तत्सर्वोद्धारपूर्वं भविकसुखकरस्तारकस्तारतेजः-
पुञ्जार्यः सेतुबन्धः किमसितमणिजः प्रादुरासीद्युगादेः ॥१६॥

श्रीआदीशसदंससद्मवसतिस्थानन्तवीर्यश्रियो-
द्धर्तुं बाहुलते निजे भवजले मन्ये निमज्जज्जनान् ।
ऊर्ध्वं किं विहिते जटाकपटतस्तत्रैव किं कज्जल-
स्निग्धार्चिश्चितिकैतवान्मृगमदश्रीभङ्गिकाविर्बभौ ॥१७॥

सर्वश्रेयःश्रियां किं ललनपृथुपथः सिद्धिवध्वावृतिस्रग्
किं मूर्त्तामूर्त्तिमत्यायततरणतरी किं भवाब्धेर्लते द्वे ।
स्कन्धद्वन्द्वे स्थिते शंफलफलनफले किन्नु देवं सदैवो-
त्प्रेक्षादक्षाः समीक्ष्य प्रदधति सुधियां सज्जटामादिभर्तुः ॥१८॥

अर्हत्कर्णगकुण्डलच्छलधरादित्येन्दुयुग्मं स्वयं
नित्यास्तङ्गतादिदोषकलुषत्वालम्भनायेव किम् ।
शश्वद्वन्द्यतमोदयाय च मुदोपास्त्यालयं सज्जटा-
कूटेनोभयतः प्रभुं शिवलयं रोगालयं लोडयेत् ॥१९॥

रागद्वेषभटौ समुत्कटकटुप्राणप्रपञ्चोद्भटौ
मिथ्यात्वाविरतोच्चटौ विघटितौ स्वस्मात्परस्मात्स्वयम् ।
मूलामूलविघात्यदृष्टकुनटौ येनर्षभेणोल्लसे-
त्तद्द्वयंसोच्चजटोपधेरिव जयश्रीणां पताकोभयी ॥२०॥

दिव्यश्रीद्वादशाङ्गीपरमतमरहस्यार्थपाथांसि दर्ष-
त्यत्यन्तैनेकान्तविश्वोपकृतिसुकृतये सत्यहो त्वद्वचोऽब्दे ।
नीलस्निग्धाङ्कुरालीवदिव सुविरतिः सर्वदेशप्रशस्या
मन्ये मूर्त्ताविरासीदभयद ! सुजटाव्याजतः पार्श्वयुग्मे ॥२१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेतस्तेऽत्र पुरे सुवर्णमुकुटप्राकाररेखाङ्किता-
लीकावासनिवासिसर्वविजयिश्रीभाग्यसम्राट् स्वयम् ।
सर्वत्रापि जयं विधाय किमथ त्रैलोक्यलोकोत्तर-
श्रीसिद्ध्यै विदधे जटाकपटतः सौभाग्यमुद्रोन्नतिम् ॥२२॥

साम्राज्यप्रदपूज्यहर्षविनयश्रीसूरिताशाशया-
दीशानन्यजराज्यहर्षविनयश्रीसूरितालोकने ।
यच्छातुच्छपथं सहर्षविनयश्रीसूरिपोपापद-
प्राज्याजय्यजयेशहर्षविनयश्रीसूरिसूरीज्य यः ॥२३॥

इत्थङ्कारमुदारहर्षविनयश्रीसूरितस्त्वात्मनः
श्रीशत्रुञ्जयमौलिमण्डनमणिर्भूयात्सदा मे स्तुतः ।
ब्रह्माद्वैतपदैकबोधिविधये श्रीधर्महंसप्रथा-
बीजायाद्भुतधर्महंससरसक्रीडाब्जिनी सम्पदे ॥२४॥

*

For Private And Personal Use Only

## चतुर्दश स्वप्न स्तुति गर्भितं श्री ऋषभजिनेन्द्र स्तोत्रम्

( उपजातिवृत्तम् )

यदङ्गजोऽयं क्रमतश्चतुर्दशोल्लसद् गुणस्थानरसोपभोगभाक् ।
प्राप्स्यत्यनन्तोदय ! संपदं सतां दत्त्वा परेषाममृतं स्वयं ततः ॥१॥

यस्यावतारे जननी जहर्ष किं चतुर्दशस्वप्नगुणेक्षणादिति ।
परोपकारप्रकृतिं तमादिमं सार्वं सदानन्दपदाय संस्तुवे ॥२॥

क्षमाक्षमात्मा शिवदर्शनास्पदं सर्वंसहः शस्यरमाकरोदयः ।
सुस्कन्धतोपार्जितसौख्यविस्तृतिः स्निग्धच्छविश्चारुपदप्रयोगगः ॥३॥

स्वप्नागतो गौरिव भाव्यहो गुणैः सुतोऽस्मदीयोऽयमितीव सञ्ज्ञया ।
पित्रादिभिर्यो वृषभः प्रतिष्ठितः
प्रष्ठः प्रभुः सोऽस्तु विभूतये भुवि ॥४॥ वृषभः ॥

सदुच्चतोच्चः सुकरस्थविस्तरः स्फुरद्गतिर्दुर्द्धरवैरिवारकः ।
मुक्ताकरश्रीस्थितिगः सदा जयी भावी गुण स्वः प्रमदी करीव यः ॥५॥

इतीव यद्गर्भभवे सितं द्विपं स्वप्ने विशन्तं मुदिता ददर्श किम् ।
[illegible] प्रसूर्विष्टपपावनाय स श्रीआदिदेवः शिवसम्पदेऽस्तु वः ॥६॥ गजः ॥

महौजसाऽनेकपराजिदुर्म्मदं भिन्दन्नमन्दां नखविक्रियां दधत् ।
सदाऽवनीशः शिवदर्शनः स्फुर-ज्जयी सुतस्यानुकृतिं कियद्गुणैः ॥७॥

कर्त्ताऽस्म्यहं तेऽम्ब ! गुणार्णवस्य तत्संसूचनायेव किमागतो हरिः ।
यस्यावतारे जननी सुसंलये स्वप्नस्थितौ तं सततं स्तुवे जिनम् ॥८॥ सिंहः ॥

अप्रत्नरत्नत्रितयेन्दिरादरी सत्प्रातिहार्यातिशयातिशायि सः ।
चतुस्ततानन्तरमारतीरतः श्रेयः श्रियां यो भविताङ्गि शम्पदम् ॥९॥

लक्ष्मेत्यदादीवमुखाब्जवेशन-व्याजाज्जनन्याः सुतभाविभाविना ।
स्वप्नस्थितौ सुस्थितिभावसम्भवा-वनी स वोऽव्यात् परमेष्ठिपुङ्गवः
॥१०॥ लक्ष्मीः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विश्वं स्वसौरभ्यभरेण भावय–न्ननिन्द्यतानासुमनोमनोहरः ।
वदन्महानन्दपदं सदोदितः स्रजेव भावी शिवदो यदङ्गजः ॥११॥

इतीव सद्वाच्यविवेचनाय यद् गर्भावतारेऽवततार किं स्वयम् ।
स्वप्ने सविश्वा स्रगियं श्रिता गुणैः सार्वः स वः सर्वविभूतिभूतये ॥१२॥ दाम ॥

जगत् स्वगोभिर्गुरुतां नयन्नयं कलालयस्तापतमः स्मयक्षयः ।
सुदक्षजातिप्रियतामृतप्रसूर्मत्तोऽप्यनन्तैर्भविताऽधिको गुणैः ॥१३॥

तवाङ्गजोऽम्बेति शशंस शीतगुर्मातुर्यदुत्पत्तिमहे महायतिम् ।
स्वप्ने किमास्योदयकैतवाद्दिवाऽवताद्भवाद्वः स जिनो भवातिगः ॥१४॥ शशी ॥

भास्वत्स्वरूपप्रकृतिस्तमोहृता–हर्तं शुचित्वं कमलोदयं तथा ।
चिन्वन्नृणां गोरचनाञ्चितो गुणै–रीषत्तुलां येन सहाहमादधौ ॥१५॥

सर्वात्मनाऽनन्तगुणेन नेति किं व्यजिज्ञपत् स्वप्नदशास्वहर्पतिः ।
मातुः स्वरूपस्य निदर्शनोपधेरपाधिराधिं द्यतु वः स सार्वराट्
॥१६॥ दिनकरः ॥

सम्पत्पदं दिव्यमहं यथा तथा सुधर्म्महर्म्यस्थपथप्रपञ्चनैः ।
उच्चाश्रयस्थायितयोत्तमात्मनां तवाम्ब ! सूनुर्भवितेत्ययं ध्वजः ॥१७॥

स्वप्नप्रकाशे निजरूपभावनव्याजादिवाऽसूचयदद्भुतोदयम् ।
यस्यावतारे भुवनोपकारकम् सुकारकः सोऽस्तु जिनः क्रियोदये ॥१८॥ ध्वजः ॥

सुवर्णवर्ण्यः कमलामलालयः पूर्णामृतात्मा सुमनोमनोहरः ।
दृष्टोऽपि शिष्टोदयतामितोऽम्ब ! ते सुतोऽधिकोऽनन्तगुणैर्मदात्मतः ॥१९॥

भावीत्यहो पूर्णनिपोऽवदद्यदैश्वर्यं प्रसूस्वप्नदशास्वयं स्वयम् ।
तत्साम्प्रतं यद्गुरुताऽखिलोच्चसत्,
पदप्रदा सोऽभयदः श्रियेऽस्तु वः ॥२०॥ पूर्णकुम्भः ॥

For Private And Personal Use Only

सारस्यशस्यं कमलामलालयं मरीचिरुच्यालिकताकलोऽज्वलम् ।
तापापहं पुण्यपदं जडात्मकं यथा भवेयं न भवत्समं मनाक् ॥२१॥

तथा विधेहीश ! ममेति गर्भगं यं विश्वपं पद्मसरः किमु स्वयम् ।
स्वप्नोपधेर्विज्ञपयत्ययं चिदामन्दप्रतिष्ठास्थितिदोऽस्तु सर्ववित् ॥२२॥ पद्मसरः ॥

पृथुप्रथार्थैः प्रथितस्तु संवरां लावण्यलीलां सकलक्षमावधिम् ।
सन्तः कुतस्त्वामिति मत्समं वदन्त्यनन्तमाधुर्यरसोज्ज्वलोऽसि यत् ॥२३॥

अहं तु नास्मीश ! तथेति यं विभुं वक्तुं मुदाब्धिः किमियाय सन्निधौ ।
प्रसूद्भवत्स्वप्नमिषादिवास्तु सः सार्वः शिवास्वादपदोदयप्रदः ॥२४॥ सागरः ॥

स्वाम्येष सेवास्पदमात्मनां सतामेतद्भवे भाव्यमृते पदेऽनुगः ।
तत्राथ यामीनमिमं श्रये पुन,-र्भवं पुनर्ईकपथदुर्लभम्मुवि ॥२५॥

चित्ते विचिन्त्येत्युचितं दिवीव किं ततोऽत्र सेवाविधये समागमत् ।
दम्भाद्विभोः स्वप्नमयान्मरुद्गृहं भूयादसौ वोऽभयदो विभूतये ॥२६॥ विमानम् ॥

स्फुरद्गुणग्रामगुरुर्जगज्जनानन्दप्रदः पादपदं सदोदितः ।
मुखं सुखानां त्वमितोदयैः समान्, मनागिहाऽनन्तगुणाधिकोऽसि मत् ॥२७॥

ममापि तत्तादृशवैभवं विभो ! देहीति यं स्वप्नदशासु याचितुम् ।
रत्नोत्करो मातृमुखेऽविशन्नु किं स बाधिदः स्तात्सुधियां सुबोधये
॥२८॥ रत्नाकरः ॥

यन्मां बृहद्भानुमहारवं वदा वदन्ति तत्त्वं परमार्थतादृशः ।
विधेहि मे तत्त्वभवावतारतः पुण्य पदं भानुरिहासि यद्बृहत् ॥२९॥

इतीव विज्ञप्तिपरः पुरः स्फुरन् यस्य प्रसूवक्त्रवरेऽगमच्छिखी ।
विधाय किं स्वप्नमिषं सुखाय स प्रणेमुषां श्रीवृषप्रभुर्भुवि ॥३०॥ शिखी ॥

चतुर्दशस्वप्नमवेक्ष्यमेति तद्, गुणोचितं तं नु जनन्यजीजनत् ।
सुतं गुणानन्त्यपदं तु साम्प्रतं तद्येन लोकोत्तररूपभृद्विभुः ॥३१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं श्रीगुरुराजहर्षविनयश्रीसूरितस्त्वं स्तुतिं
स्वामिन् ! मन्त्रपवित्रगोत्रमहिमाम्नातप्रमेयप्रमः ।
सारादारनिजक्रमाब्जसरसोपास्ति प्रदेहीश ! मे
पूज्यश्रीगुरुधर्महंसललनस्फारस्फुरन्मानसम् ॥३२॥

## ऋषभजिनेद्रस्तवनम्

( शार्दूलविक्रीडितम् )

ॐकारः सकलत्रिलोककमलास्वीकार लीलाविधौ,
ह्रींकारः कलिकालकल्मषमलप्रक्षालनाकर्मणि ।
सत्यङ्कार उरुप्रसिद्धमहिमश्रीमत्परब्रह्मणः
श्रीनाभेयजिनेश्वर क्रमनमस्कारः श्रिये स्तान्मम ॥१॥

सच्चारित्ररमा विवाहसमये यद्देहगेहाङ्गणे,
वंशप्रांशुभुजाग्रदतुलस्कन्धद्वयव्यापिनी ।
यस्तो मङ्गलकुन्नवाङ्कुरयवश्रेणीव वेणी जटा,
स श्रीनाभिभवः श्रियेऽस्तु विभवः संप्राप्तसद्वैभवः ॥२॥

शुक्लध्यानजलैः शशाङ्क विमलैर्मुक्तार्गलैः शीतलैः-
राकण्ठं परिपूरितात् प्रतिदिशं यन्मानसान्मानसात् ।
कल्लेवर्हि...रुज्झिता शितितरा रेजे रजः शैवल-
श्रेणीवांसजटा स दालयतु वो विघ्नान् युगादीश्वरः ॥३॥

यस्यान्तः करणाम्बुजान्मुकुलितान्मायातमायाविशा-
दिव्यज्ञानसहस्रदीधितिकरप्राग्भारविस्मेरीतान् ।
मिथ्यानल्पविकल्पकोटिपटलीभृङ्गावलीवाद्ययौ,
स्कन्धाग्छिजदाछलेन ऋषभः सोऽस्तु श्रिये भाविनाम् ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्धि कारयितुं यदीयवचसा पीयूषयूषस्य किं ?
माधुर्येण निराकृतस्य भयतः पातालमासेदुषः ।
तत्कुण्डाधिकृता फणाभृत इमे प्राप्ता जटाकैतवात्,
कर्णाभ्यर्णमसौ स सौख्यमखिलं देयाद्युगादीश्वरः ॥५॥

श्रीमद्विभुर्भुवनानि भासुरतरैस्तेजोभिराभासयन्,
श्रीनाभेः कुलदीप उत्तमगुणस्थानैकपात्रे स्थितः ।
दग्धानङ्गपतङ्ग उज्ज्वलदिशासङ्गः सुरङ्गज्जटा-
प्रोन्नीद्राञ्जनरेख एष ऋषभस्तत्त्वप्रकाशी द्रवः ॥६॥

( स्रग्धरावृत्तम् )

स्वामिन् ! मां निष्कलङ्कां परिहरसि किमु स्नेहलां कर्तुमेवं ?
विज्ञप्तिं राज्यलक्ष्म्याऽनुनयनिपुणया दूतिके प्रेषिते किम् ।
दीक्षायां यस्यशस्यश्रुतितटजटयोः कैतवाद्दैनदम्भात्
स श्रीनाभेयदेवः प्रथयतु भवतां संहतीरीहितानाम् ॥७॥

(शार्दूलविक्रीडितम् )

यद्वक्त्रेण जिता पयोजपटली नंष्ट्वाऽम्बुदुर्गं श्रिता,
तत्रापि व्यथिता मरालविहगैः कीर्तेः सुहृद्भिस्ततः ।
तस्मा...ऽम्बुजिनीव संधिविधये यत्पृष्ठिलग्नाऽभ्रमत्,
प्रेङ्खत्कुन्तलमालिकाकपटतः सोऽस्तु श्रिये नाभिभूः ॥८॥

स्वामिंस्त्वन्मुखमत्सरान्मम पतिर्जातः कलङ्की ततः,
कारुण्यैकनिधे ! प्रसीद न पुनः सेर्ष्यो भविष्यत्यसौ ।
कर्णाभ्यर्णमिवाययाविति तमी विज्ञप्सुरिन्दुप्रिया-
व्याजात् स्कन्धजटावलेः स भवतां श्रीआदिदेवः श्रिये ॥९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौभाग्यैकनिधिर्जरापधिलुलन्नोलालिमालोदधि-
दौरिद्रयप्रलयः प्रभारुणनखप्रेङ्खत्प्रवालालयः ।
निर्वाणैकफलः कराङ्गुलिदलश्छायाश्रिया मांसलः,
कल्पद्रुर्वृषभः करोतु स शुभश्रेणीं सुवर्णप्रभः ॥१०॥

उद्बद्धध्यानदवानलोच्छलदुरुपज्वालावलीप्रज्वलत्-
दुर्वारस्मररागरोग विषयाऽहङ्कारकान्तारतः ।
धूमश्रेणिरुदुल्लास किमसौ यन्मौलिदेशे जटा-
व्याजेन त्रिजगत्प्रभुः स जयतात् श्रीआदितीर्थङ्करः ॥११॥

यस्मिन् श्रीसदने विभाति भुजयोर्युग्मं बृहत्तोरणं,
स्तम्भद्वन्द्वनिभं सपूर्णकलशं पीनांसयोर्दम्भतः ।
खेलत्केकिलं तदूर्ध्वमतुलं रेजे जटामण्डलं,
देवः सेवकवत्सलः स जयताच्छ्रीमारुदेवश्चिरम् ॥१२॥

धर्मद्रोहणलम्पटं जितवतोर्मोहं जगत्कण्टकं,
स्वामभ्यर्णमवाप्तयोः सबलयोः सुध्याननयोर्वीरयोः ।
मुक्तेः खड्गलते इव प्रभवतुर्यत्के जटासन्तती,
स श्रीआदिजिनस्तनोतु विजयं स्वभूभवो नायकः ॥१३॥

सोल्लासं परिरब्धयोः सुचरणज्ञानश्रियोः सन्ततं,
दिव्यन्नीलमणीघृणीविलुलिते......वेणीद्दशोः ।
यस्यांसस्थलयोर्विलोलनलिनीनीलीदलश्यामले,
भ्रातः कुन्तलमालिके स जयतु श्रीनाभिजन्मा जिनः ॥१४॥

नाभेः सम्भवमाप पापशमनः स्रष्टा च वेदस्थितेः,
संप्राप्तः परमेष्ठिनां वरचतुर्वर्गव्यवस्थाकरः ।
यो ब्रह्मा जनकश्चतुर्मुखधरः स ब्रह्मरूपः सतां,
लोलन्नीलजटावलिः कलिमलं भिन्द्याद्युगादीश्वरः ॥१५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



( स्रग्धरावृत्तम् )

शुक्लध्यानानलेन प्रसृमरमहसा देवमूषान्तराले,
जीवद्रव्यात् सुवर्णादतिमलिनतमाद्यैश्च सन्ताप्यमानात् ।
रागद्वेषादिकिट्टिप्रकर इव बहिः कुन्तलालीछलेन,
जातः सञ्जातरूपद्युति ऋषभजिनः स श्रिये भूर्भुवःस्वः ।।१६।।

स्पर्द्धा सार्द्धं त्वया यत्प्रतिहतमितिभिर्निर्मिता कल्पवृक्षै-
र्हानिस्तेषां ततोऽभूद्भुवि भवति शुभं स्पर्द्धया किं मदद्भिः ।
स्वामिंस्तेषां प्रसीद त्वमिति कथयितुं तत्प्रियाकल्पवल्ल्यः,
प्रापुर्दम्भाज्जटानामुपयदृषभः श्रेयसे वः स भूयात् ।।१७।।

( शार्दूलविक्रीडितम् )

....युगल स्वभावसरले लावण्यपुण्यामृता,
यस्य प्राणिगणैः स्वलोचनपुटैः पेपीयमानात्स्रवा ।
तद्बिन्दुप्रकरैः पतद्भिरुदगुर्दूर्वाङ्कुरा अंशयो-
र्लोलत्कुन्तलकैतवात् स भवताच्छ्रीनाभिभूर्भूतये ।।१८।।

सौभाग्यैकनिधानयोर्नयनयोर्यस्य प्रशस्यश्रियो,
रक्षाधानकृतावधानमुरुगद्वन्द्वं घनश्यामलम् ।
पीनस्कन्धतरा विलम्बितजटाव्याजात्तनु भ्राजते,
श्रेयः श्रेयगुणाश्रयः स वृषभस्तन्यात् सुभव्यात्मनाम् ।।१९।।

क्रेऽस्माभितीवाऽनुनयविधये मोहराजस्य दत्तो,
तस्मात् कस्मादकस्मात् प्रभुरधिगतवानस्मदुच्छेदकर्त्रीम् ।
दीक्षामेतामितीवाऽनुनयनबिधत्तो मोहराजस्य दूतो,
यत्कर्णाभ्यर्णमाप्तौ चिकुरततिमिषात् स श्रिये नाभिसूनुः ।।२०।।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पावित्र्योज्ज्वलतादिकान् गुणगणान् गङ्गापगाया इव,
त्वं मह्यं जिन ! देहि देहिपटलीवाञ्छासुपर्वद्रुम ।
एवं प्रार्थनयेव सूर्यतनया यस्याऽन्तिकं सङ्गता,
दम्भात्कुन्तलसन्ततेः स तनुतां श्रीआदिदेवः श्रियम् ॥२१॥

सम्यग्ज्ञान समुज्ज्वलस्थिरजलः सत्कज्जलश्यामलो-
न्मीलत्कुन्तलपारिजातकदलप्रोल्लासितांस स्थलः ।
कल्याणद्युतिमञ्जुलः पथि दृशोः प्राप्तः कलन्मङ्गल-
श्रेणीभिर्वृषभः स पूर्णकलशः सौख्यानि पुष्णातु वः ॥२२॥

[ स्रग्धरावृत्तम् ]

गाङ्गेयच्छायकर्णद्वयरुचिररुचिप्रेङ्खदैरम्मदश्री-
दन्तज्योतिर्बलाकाविततिपरिगता मेघमाला विशाला ।
व्याख्या गम्भीरनादैरिव सपदि जिता कुन्तलालीछलेन,
प्राप्ता यत्सेवनार्थं प्रथमजिनपतिः सोऽस्तु शस्यश्रिये वः ॥२३॥

[ शार्दूलविक्रीडितम् ]

रूपातीतपदस्थितोऽपि भगवान् बाह्यैर्विकल्पैरसा-
वेवं ध्यानपथं कथंचन मया नीतो युगादिप्रभुः ।
ज्ञात्वा बालकचापलं तदपि मे कारुण्यपुण्यार्णवः ।
कुर्याच्छ्रीगुरुसोमसुन्दरपरब्रह्मैकलीनं मनः ॥२४॥

*

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ऋषभजिनेन्द्रस्तवनम्

( उपेन्द्रवज्रावृत्तम् )

सदा चिदानन्दनिदानमद्वयं जगत्त्रयीत्राणधुरीणपद्द्वयम् ।
सरस्वतीतुष्टिकृते सरस्वतीपदार्थ सार्थैः प्रथमं जिनं स्तुवे ॥१॥

सरस्वतीलब्धवरावगाह्ये सरस्वतीवेश ! तव स्तवे स्वाम् ।
सरस्वतीमेष परस्तवैकसरस्वतीणामपि तारयामि ॥२॥

सरस्वतीमेकलेकन्यकास्वः सरस्वतीसिन्धुमुखेषु मज्जन् ।
सरस्वतीष्वर्थयते न शुद्धिं सरस्वतीव स्तवने तवास्तान् ॥३॥

सरस्वतीमेत्य मनोरतीरं सरस्वतीत्यत्रिदशैः प्रभो ! यत् ।
सरस्वतीतेषु दिनेषु दोग्ध्रुसरस्वतीभिः स्नपितोऽसिवाभिः ॥४॥

सरस्वतीनाथनिरस्य पादमसरस्वतीमम्बुजवासलीलाम् ।
सरस्वतीरुग्भिरुपैत् पदे ते सरस्वतीतार्त्तिरदोऽर्चकायत ॥५॥

सरस्वतीपङ्क्तिरपि प्रदत्तसरस्वतीदुग्धसुधामुधात्वैः ।
सरस्वती सद्धवलैः कृताच सरस्वतीर्थोद्भवगायतित्वाम् ॥६॥

सरस्वती पत्रभरैर्हरं मत्सरस्वतीर्थ्ये परिपूज्य पूर्वम् ।
सरस्वती त्वत्कुमुदोपमेवा सरस्वतीवापुषि वादहेतोः ॥७॥

सरस्वती पूजयते मयि त्वं सरस्वतीत्थं तव कर्तृताढये ।
सरस्वतीर्थंकरकर्मभावं सरस्वतीव प्रकृते तथाऽस्या ॥८॥

सरस्वती यन्नयनेन वीक्ष्य सरस्वतोस्त्वय्यपिदुष्टकल्पृप्ताः ।
सरस्वती न क्षुधितस्य सरस्वतीतिश्च पिपासितस्य ॥९॥

सर्वत्र सर्वज्ञपुरः सरस्वतीस्तवाङ्गभाग्मध्यपदे सरस्वतीम् ।
भजेत नक्तं दिनके सरस्वतीतयन्मुखात् श्रीधृतिभासरस्वतीम् ॥१०॥

---

१. मेखलकन्यका–नर्मदा नदी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तनूमतां योऽघाविधूसरस्वती तनत्तनूरत्नचकासरस्वती ।
न तत्र कर्तयपि मत्सरस्वतीर्थिकेरमीशस्य न मा सरस्वतीः ॥११॥

तनोति यः कश्चिदपासरस्वतीपूर्वस्थवर्णाननुतः सरस्वतीन् ।
त्वच्छासने सत्त्ववियुक्तसरस्वतीर्वधू भुनक्तयेष सुहा सरस्वती ॥१२॥

यशस्ततिस्ते जगतीं सरस्वती पुनाति नेतः सुखदा सरस्वती ।
विधुं धरां चाभिसु वा सरस्वती कर्त्तुं च याकृतप्रतिमा सरस्वतीः ॥१३॥

त्वं तीर्थप व्यत्ययतः सरस्वती वपुस्मृता सैरनिश सरस्वती ।
ततोऽपि च त्वं वरदा सरस्वती बलाकभूमौ समवास सरस्वतीः ॥१४॥

योऽनङ्गसौख्येन परा सरस्वतीनृपत्ययुग रसपदमुक्सरस्वतीम् ।
बध्नाति किं तर्हि परां सरस्वतीं ह्रियाऽन्ययिते विरमेत्सरस्वतीः ॥१५॥

कर्मापराह्वाधरका सरस्वती रणक्रियापूर्वतवा सरस्वती ।
तया विना त्वां भुवि चेत्सरस्वती लिकादियोनौ बहुशो सरस्वतीः ॥१६॥

स एव शस्यः परिवत्सरस्वती तपस्तपोऽन्यैर्यममत्सरस्वती ।
भव्याघहारेऽथ वधूसरस्वती नकादिपूज्य श्रितकेसरस्वतीः ॥१७॥

क्रष्टुं नरैः किं हरिकेसरस्वतीप्सते यथांसे हयके सरस्वती ।
हन्तुं परेषामिव ते सरस्वती शाच्यस्य भान्यैर्न तथा सरस्वती ॥१८॥

सरस्वतीस्त्वतशब्दपूर्वसरस्वतो मूलविधं विमुच्य ।
सरस्वतीक्ष्णं क्रमयामलं ते सरस्वती तं कलयन् श्रियाभूः ॥१९॥

सरस्वतीदानवती द्विषत्कसरस्वतीवं त्वद्दते सृजेद्यः ।
सरस्वती सङ्गमनं जिनाग्रे सरस्वती हेष न केवलाप्त्या ॥२०॥

सरस्वतीवप्रतिलोमसंवत सरस्वतोकारितविश्वलोक ।
सरस्वती नाथ विहाय नन्दी सरस्वतीभ्यस्तव पूजकोऽङ्गी ॥२१॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सरस्वती कण्ठविभूषणा स सरस्वतीयन्मनसां नतानाम् ।
सरस्वतीनां गिरमेतदापे सरस्वतीव्यकिरणाम्भसा यत् ॥२२॥

सरस्वतीद्वीपसमीपवर्त्ति सरस्वती वारिधिपारनर्त्ति ।
सरस्वतीर्थश्चरणं यशः सा सरस्वती भूतसुराच्यंतेऽदः ॥२३॥

सरस्वतीत्रं भवमत्रमासीं सरस्वतीर्थे जलधाविव स्वम् ।
सरस्वती यां तव नेतरेषा सरस्वती मां ब्रुवतीव मूर्त्तिः ॥२४॥

सरस्वतीपत्तनर्त्तकीर्त्तेः सरस्वतीबन्धूसमानमूर्त्तेः ।
सरस्वतीभ्रातृजसद्गुरोर्गीः सरस्वतीत्य मयाऽङ्घ्रिभाजा ॥२५॥

सरस्वतीति प्रकृतेर्भवो यः सरस्वतीति त्वदुवेदिशब्दः ।
सरस्वतीवर्णभुदित्यपुष्पसरस्वतीरः प्रणुतः स्तुतोऽर्हन् ॥२६॥

[ शार्दूलविक्रीडितम् ]

भूनाभिक्षितिभृत्सनाभिमहिमश्री नाभिभूपान्वय,
श्रीमन्मौक्तिकरत्नशेखर शिवश्रीनामवामभ्रुवः ।
इत्थं नाथ मया विनीतमनसा नीतो नुतिं देहि चि—
ल्लक्ष्मीसागरसोमदेवमहितां चारित्ररत्नश्रियम् ॥२७॥

*

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीऋषभजिनेन्द्रतस्तवनम् ॥

( इन्द्रवज्रावृत्तम् )

युगादिदेवाय युगादियोगिने युगादिराजाय युगादिशिल्पिने ।
अपार संसारपयोधिसेतवे नमो नमस्ते जिन ! मुक्ति हेतवे ॥१॥

अलोकमाक्रामति यः सलीलया विशीर्णसीमार्गलमेकझम्पया ।
स एव ते वृत्तविशेषवर्णनाविधानसंरम्भपरः परं नरः ॥२॥

बलिं व्रजामः कतिशः स्वयं वयं सुमेधसस्तस्य महेश ! वेधसः ।
भवद्गुणग्रामसमृद्धिशंसिनीं चकार वाणीं विदुषां मुखेषु यः ॥३॥

अजानतां भेदमुषर्बुधांभसोः स्वयं स येषामभवद् भवान् गुरुः ।
अशेषसम्पत्तिविलाससम्पदां त्रिसन्ध्यमेषामहमानतस्त्रिधा ॥४॥

इमामशेषां प्रविभज्य काश्यपीं यथायथं पुत्रशताय कल्पयन् ।
विधातुकामो विषयोपसंहृतिं व्यधत्त भूम्ना विषयान् कथं भवान्॥५॥

बभूव नैकोऽपि समुद्रमाश्रयन्नमुं प्रचेताश्च्युतपाशवैशसः ।
भवन्तमाराध्य समुद्रशेखरं पुनर्विपाशाः कति न प्रचेतसः ॥६॥

नमोऽस्तु तस्मै भुवनोपकारिणे मनः प्रयत्नाय यथाप्रवृत्तये ।
सदाऽस्य नासादिततत्त्वविप्रुषो यतस्तवोत्कं स्पृहयन्ति जन्तवः ॥७॥

तपोभिरुग्रैः करणोपरोधनैरकृत्रिमैरादधतस्तव स्थितिम् ।
विपश्चितः के न भवन्ति हेतुना सचेतसोऽपि प्रविलीनचेतसः ॥८॥

तमः प्रणष्टामलदृष्टिवर्त्मनि प्रबद्धभिधे(?) प्रभवद्भिः कर्मणि ।
खेरिवोन्मीलित भाववैभवस्तवावतारं जिन ! भारतेऽभवत् ।
तवांघ्रिसेवारसिकैः कुटुम्बितामिह प्रपन्नैरवनौ सुरासुरैः ॥९॥
कृताश्चिरं यामिकमात्रदेहिनो(त)
रसातल स्वर्गनिवासिनो महाः ॥१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अमुं प्रमथ्नन्ति न ये जडाविलं तवाध्वमन्थेनभ वोदधि बुधाः ।
भवन्ति सर्वेन्द्रियशान्तवेधसो न ते नवीनाऽमृत सम्पदां पदम् ॥११॥

निवासमर्हन्ति न ये महोदधे (?) मलीमसा मुक्तिपुरे वपुः स्पृशः ।
कृता भवग्रामतलेषु ते त्वया विपन्नृपाणां करदाः कुटुम्बिनः ॥१२॥

महांहसां दुर्नयशूरचेतसां विमोहमूर्च्छोलुदृशां च मादृशाम् ।
शरण्या को नाम सकर्णमानसो ध्रुवं त्वदन्यः शरणं भवे भवेत् ? ॥१३॥

बृहन्न किञ्चिद् गगनाङ्गणात् परं न चापरं मुक्तिपदात् प्रियङ्करम् ।
न बीजमन्यद् व्यसनस्य कामतः परे न कश्चिन्न भवतो यथार्थवाक् ॥१४॥

अहंयवो ये किल रोषतोषजैः रैः प्रबन्धैरिपुमित्रवद्धिभिः ।
उपासितैस्तैर्मनसापि मादृशश्चिरं त्रपन्ते तव किङ्करा अपि ॥१५॥

वसुन्धरामश्नुवतां नृपार्चिता भवन्तु शास्त्रैरपिसन्तु विश्रुतः ।
सुखोन्मुखे चेत् पथि सोत्सवाः परेतदा भुजिष्यैस्तवमादृशैर्जितम् ॥१६॥

अखण्डिताखण्डलवन्दितश्रिया त्वया त्यजन्तः सहसाम्यविप्लवम् ।
सुधामयीं तामपि मुक्तिभूमिकां मनीषिणो न स्पृहयन्ति चेतसि ॥१७॥

त्रिलोकरक्षाभिरिहाभिमन्त्रितः प्रियङ्कराभिस्तव सूक्तिपङ्क्तिभिः ।
दृढानुबन्धैरपुनर्ग्रहं ग्रहैश्चिरं गृहीतोऽपि न कोऽपि मुच्यते ॥१८॥

व्रतं विहाय स्पृहयन्ति ये श्रियं व्रजन्ति ते पूज्यतमां परे दशाम् ।
त्वया पुनर्देव ! विमुञ्चतां व्रतं स्थितिः प्रकल्प्तामलिनानुरूपिणी ॥१९॥

तदेव नास्त्यस्ति तदेव चेत्ययं चलाचलस्ते वचनस्याडम्बरः
शिवाय कस्याप्यशिवाय कस्यचिन् मुदेऽथ कस्याप्यमुदेऽथ कस्यचित् ॥२०॥

अमुत्र यत् किञ्चितचिन्त्यवैभवं सनातनं शर्म न तत्र साक्षिणः ।
इहापि गच्छंस्तव देव ! वर्मना भवत्यवाच्यस्य न भाजनंजनः ॥२१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणैकरूपा गमभङ्गशालिनो चकास्ति येयं नव वाक्यवागुरा ।
स एव दूरं विनियम्यते न या य एव बन्धैरचिराय मुच्यते ॥२२॥

प्रसीद सीदन्तममुं जगज्जनं नियोजय क्वापि महार्थकर्मणि ।
क्षमाभृति त्वय्यपि शासति प्रजामजातदैन्या कथमीश ! नाङ्गिनः ॥२३॥

क्रतुक्रियाभिर्विषयोपदेशनां निशम्य वाचो हृदयङ्गमा जनः ।
विरोधिनीवैषयिकस्य शर्मणः क एव ते सूक्ष्मगिरोऽनुरुध्यते ॥२४॥

विशृङ्खलैर्योऽमृतपोऽपि लज्जते प्रियाप्रणामप्रभुखैर्विकर्मभिः ।
परां परेतैरपि यान्ति पूज्यतामहो विमोहान्धलमानसं जगत् ॥२५॥

प्रसादमासाद्य कुतीर्थिनांजनः सलाघवोऽपि ध्रुवमेत्य गौरवम् ।
तव प्रसादा( न् ) न पुनर्मुहुर्मुहुः स गौरवोऽप्यञ्चति लाघवं परम् ॥२६॥

अकल्पवृक्षा विबुधप्ररोहिणी विशीर्णदोषा गुरुराजराजिनी ।
समुत्थितज्योतिरकृष्णवर्त्मिका त्वयि प्रभो ! सारतभूरभूदियम् ॥२७॥

शुभाशुभं बाह्यमथान्तरं भवत्प्रणीतसंवादि विलोकयन्नपि ।
प्रशान्तिवन्ध्यैर्महिलाभिरुक्तिभिः प्रतार्यतेपश्यपरैः कथं जनः ॥२८॥

सतां न तत् कौतुकमस्तु विप्लुते यदेष भूयांस्तव गौरवोदयः ।
कृपाद्विषः कामजुषः परां परे यदञ्चितिं यान्ति तदेवकौतुकम् ॥२९॥

पटूनि चाटूनि कियन्तिकुर्महे महेश ! युष्माकमपारसम्पदाम् ।
विना न यः शर्म सतां सदोदयं वचोभिरेभिः किल किं न पूर्यते ॥३०॥

विघट्यकलुषाणि भूर्भुवः स्वर्घटय घटां शिवसम्पदामपाराम् ।
उपनय गुरुकर्म्ममर्म्मभेदं नयभावंभीतिमसम्भवामवस्थाम् ॥३१॥

माहात्म्यं तव परिमातुमीहते यः संख्यातुंजगदणुसञ्चयलोलः
साफल्यं तदपि सुमेधसः स्ववाचामाधातुं विदधति ते गुण प्रशस्तिम् ॥३२॥

तां पुण्यपापजयिनीं कनकाभिराम चन्द्रांशुपुञ्जविशदामधिगम्य भूमिम् ।
आत्यन्तिकीमनुभवामि यथा मुदं मे श्रीनाभिनन्दन ! तथा प्रथय प्रसादम् ॥३३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जय देवाधिदेवं देवत्वं,
जय नाभिनरेन्द्रजम् ।
जय कामितकल्पद्रो,
जय संसारतारक ॥१॥
जय चिन्मात्रमग्नत्वं,
जय तत्त्वोपदेशक ।
जय दारीदराऽरक्त,
जय स्फारादरान्वित ॥२॥
जय ज्ञानामृतसक्त,
जय ध्यानामृताचल ।
जय योगीन्द्रनाथत्वं,
जय भोगीन्द्रसेवित ॥३॥

॥ श्रीशत्रुञ्जयस्तोत्रम् ॥

जय श्रीविमलाद्रीश जय श्रीविमलालय ।
महानन्दपदं देव महानन्दपदं ददा ॥१॥
शत्रुं शत्रुञ्जयाजय्य च्छिन्द्धि भिन्द्धि तमस्तमम् ।
ग्रन्थि ग्रन्थं च निर्ग्रन्थसेव्यसेव्यतमाह्वया ॥२॥
सिद्धक्षेत्रं सुसेत्रध्वं सिद्धिक्षेत्रं सतां मतम् ।
भाविका भविकात्मानः पापापायवियत्पदाम् ॥३॥
पुण्डरीकाचलं वन्दे श्रीपदं पुण्डरीकवत् ।
सहसा सहसानेकदोषपोषविशोषकृत् ॥४॥
भक्तिभक्तिभरैरेवं स्तुतैः सिद्धगिरिर्गिरिः ।
स्थितः सुस्थितदो मेऽस्तु श्रीहर्षविनयश्रिया ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ षड्भाषामयानि जिनपञ्चकस्तोत्राणि ॥

श्रीणां प्रीणातु दानैः प्रथमजिनयतिर्नाभिभूर्भूर्भुवः स्वः
सेवाहेवाकिनाकि प्रभुमुकुट तटस्पृष्टपादारविन्दः ।
भूतो भावी भवन्वाऽनणुरणुरपि वा भावराशिः समस्तो
यज्ज्ञाने तुल्यकालं प्रतिफलति यथा स्वस्वरूपव्यवस्थम् ॥१॥ (संस्कृतम्)

जेणं भारहरिवन्ति झन्ति वयिं सद्धम्मबीयं तया
एगेणावि तहा पसंतहियओ सो पुंडरीओ कओ ।
जो अट्ठावयपिट्ठिसंठियतणू पत्तो परं णिव्वुइं
देवाणं पढमं अपुव्ववसहं भत्तीइ वंदामि तम् ॥२॥ (प्राकृतम्)

जो जो इंदणरिंदवंदियपदो तेलुक्कचिंदामणी
जं आलिंगदि रागसंगदिमदी सा मुत्तिलीलावदी ।
जो दा णिव्वुदिदीविआ गदमला विज्जपसूदी जदो
सो सामी रिसहो जिणिंदवसहो दिज्जा सुविज्जामुहं ॥३॥ (शौरसेनी)

तावत्तत्तसुवण्णवण्णलुहणे यश्शंझदेश्शे जडा-
पंदी लाथदि इंदनील फलिणी तापिश्यशुश्यश्युवी ।
लभ्मा कप्पलदा यथाशुलगिलिस्कंधंमि तुंगे स्तिदा
शेपश्चालहु णाभिरांयतणए मे वश्ययंबा... ॥४॥ (मागधी)

धारिंतो पकटं अनुक्कटजटाजूटच्छटाडंबर
तं निंतो मतनं कतंतसततं तिंतो भवानी हितम् ।
स वज्जू गननाथवंतितपतो तेवाहितेवो सतां
भव्वानं वसदद्धजो जिनपती तिज्जा पतं सासतम् ॥५॥ (पैशाची)

सप्फूतप्फालफालप्पकटितलफसुप्फूतलोमंचलाची
सोफालाचं ततेहा मुलमुललचितो तालपूचोपचालो ।
खीलाखोखप्पपलहुतवहुच्छंपनोमंखसंखो
भोत्तु च्चोलुक्कपंथू कसटफलहलो मारुतेवो चिनिंतो ॥६॥ (चूलिकापैशाचिकम्)

वाणिज्जव्ववहारपाणिगहणग्गामागराइट्ठिई
धम्माधम्मविचारु सारु कहिआं जेणं जए साहुवि ।
अम्हे आण वहंतडा तसु तणी सीसल्लडे अप्पणे
पाए आदिजिणेसरस्सु नमहुं आणंदमब्भवसया ॥७॥

॥ इति श्रीऋषभदेवस्तवनम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ अथ शत्रुंजय-तीर्थस्तोत्रम् ॥

पूर्णानन्दमयं महोदयमयं कैवल्जचिद्दङ्मयं,
रूपातीतमयं स्वरूपरमणं स्वाभाविकश्रीमयम् ।
ज्ञानोद्योतमयं कृपारसमयं स्याद्वादविद्यालयं,
श्रीसिद्धाचलतीर्थराजमनिशं वन्देऽहमादीश्वरम् ॥१॥

श्रीमद्युगादीश्वरमात्मरूपं, योगीन्द्रगम्यं विमलाद्रिसंस्थम् ।
सज्ज्ञानसद्दृष्टिसुदृष्टलोकं, श्रीनाभिसूनुं प्रणमामि नित्यम् ॥२॥

राजादनाधस्तनभूमिभागे, युगादिदेवाङ्घ्रिसरोजपीठम् ।
देवेन्द्रवन्द्यं सुरराजपूज्यं, सिद्धाचलाग्रस्थितमर्चयामि ॥३॥

आदिप्रभोर्दक्षिणदिग्विभागे, सहस्रकूटे जिनराजमूर्तीः ।
सौम्याकृतीः सिद्धततीनिभाश्च, शत्रुंजयस्थाः परिपूजयामि ॥४॥

आदिप्रभोर्वक्त्रसरोरुहाच्च, विनिर्गतां श्रीत्रिपदीमवाप्य ।
यो द्वादशाङ्गीं विदधे जिनेशः,स पुण्डरीको जयताच्छिवाद्रौ ॥५॥

चउद्दसाणं सयसंखमाणं, बावण्णसहियाण गणाहियाणं ।
सुपाउआ जत्थ विरायमाणा, सत्तुंजयं तं पणमामि णिच्चं ॥६॥

चत्तट्ठकम्मा परिणामरम्मा, लद्धप्पधम्मा सुगुणेहिंपुण्णा ।
चत्तारि अट्ठादस दुन्नि देवा, अट्ठावए ताइं जिणाइं वंदे ॥७॥

अणंतणाणीण अणंतदंसिणो, अणंतसुक्खाण अणंतवीरिणो ।
वासं जिणा जत्थ सिवं पवण्णा, समेअसेलं तमहं थुणामि ॥८॥

जत्थेव सिद्धो पढमं मुणिंदो, गणाहिवो पुंडरिओ वसिट्ठो ।
अणेगसाहू परिवार संजुओ, तं पुंडरीआचलमच्चयामि ॥९॥

विमलगिरिवतंसः सिद्धिगङ्गाम्बुवंशः,
सकलसुखविधाता दर्शनज्ञानदाता ।
प्रणतसुरनरेन्द्रः केवलज्ञानचन्द्र,
सृजतुमुदमुदारां नाभिजन्मा जिनेन्द्रः ॥१०॥

॥ इति तीर्थराजमहामहिमाभिधानं गणाधीशकृतं स्तोत्रं सम्पूर्णम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्री तीर्थराजाधिराज पूजातिशयस्तोत्रम् ॥

यस्यां वश्या विशदविधिना वन्दनप्रत्ययाद्यैः
कायोत्सर्गप्रकटितपदुद्रव्यपूजानुमोदैः ।
भव्याभव्याभिमतसुफलान्याप्नुवन्त्यद्भुतानि
श्रीसार्वानां वपुषि सुषमापोषिपूजां श्रये ताम् ॥१॥

अर्हतामर्हणा गर्हणीया कदाप्यस्ति नैवार्हणीयागमैरार्हतैः ।
येन पूजैव पूज्यत्वभावोद्भवे विद्यते सत्यकल्कस्वभावोद्गमा ॥२॥

द्रव्यभावस्तवद्योतिनी देशतः सर्वतः सद्भिरस्याद्दृतिः सङ्गता ।
अन्यथा तथ्यपथ्यप्रथासंस्थिता-स्ताःक्रिया निष्फलास्तेन पूजा जयेत् ॥३॥

द्रौपद्याद्या सदयविशदा दर्शनोद्द्योतदीप्रा,-
स्तत्त्वातत्त्वव्यतिकररसाः स्वादलुब्धस्वचित्ताः ।
भक्तिव्यक्त्या महिमसुभगां जैनचैत्योचितार्चाम्
यामाकार्षुः शिवसुखखनिं तां न कः श्रद्दधीन ॥४॥

विद्याजङ्घाचारणश्रीमुनीशै, र्नित्यस्थानस्थायिचैत्यात्रलीनाम् ।
सेवां कृत्वा वन्दनादिप्रयोगैः सौत्राचाराश्चारु शौचीक्रियन्ते ॥५॥

पूजाद्वैतोदारसारानुमोदो,-पास्तिभ्यां श्रीआज्ञया सङ्घसङ्घैः ।
श्रीसम्यक्त्वं ज्ञानचारित्ररत्नम्, मोक्षश्रीदं संविधीयेत शुद्ध्या ॥६॥

कल्याणाली ललनमभितः सर्वसम्पद्विलासा
निष्प्रत्यूहं महिमपदवीसौख्यपोषप्रकर्षाः ।
स्थाने स्थाने सरससुभगाभोगभोगप्रयोगाः
सम्पद्यन्तेऽभयद ! विशदार्चाप्रचारेण पुंसाम् ॥७॥

श्रीजिनपूजनमद्भुतसम्पत्सौख्यविशेषनिषेचककल्कम् ।
नौमि कलाकलताकलनाभम्, शुद्धविधेः शिवदं विहितं सत् ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शासनं द्रव्यभावस्तवालङ्कृतं देशतः सर्वतः संयमोपासनम् ।
साम्प्रतं स्यात्तदैवार्हतार्चोचितो द्रव्यतोऽङ्गीक्रियेत प्रधानो विधिः ॥९॥

यामाराध्याभ्यधिकविधिना श्रेणिकाद्या नरेन्द्राः
प्रापुः पूज्याभयदपदवीमक्षयक्षायिकाख्याः ।
श्रीदेवार्यक्रमणकमलोपासनावासनाक्ताः
संसेवन्ते सुकृतरसिकाः केऽर्हतामर्हणां ताम् ॥१०॥

त्रिशराष्टविधा तथा बहूचितभेदा विविधाधिकारिभिः ।
विहिता सकलांहसां हर्ति तनुतेऽर्चाऽभयदेषु सर्वदा ॥११॥

भुवनत्रयनित्यचैत्यगाः प्रतिमा अप्रतिमप्रभावकाः ।
प्रणमामि मुदार्चनादिभिः करणैर्निर्वृतिशर्म्मसम्पदे ॥१२॥

श्रीवैकुण्ठः सुगुरुर्यतिनां वन्दनैर्दुर्गतीस्ता-
श्चिच्छेद श्रीजिनबलिविधेरादधौ क्षायिकाद्यम् ।
श्रीश्रेयांसः सरसमनसा पात्रदानं व्यधाद्यत्
तस्य श्रेयः सुखपदमभूत्तत्र पूजानुभावः ॥१३॥

श्रीसूर्याभः स्वर्गिमुख्यः सुरर्द्ध्या,
वीरस्याग्रे साधुराजीवृतस्य ।
दिव्यं लास्यं भूरिभङ्गीप्रभेदै-श्चक्रे
कारीशेन तस्यैककृत्यम् ॥१४॥

अर्हत्पूजा जयति जयदाबाधमाराध्यसाध्या
नानाभेदोदितविधिधिया शुद्धबोधिप्रबोधा ।
दुष्टादृष्टप्रकृतिविकृतिं प्रत्यहं संक्षिपन्ती
त्रैलोक्यस्थासुरसुरनरैः सर्वदा सेव्यमाना ॥१५॥

अर्हणाऽऽर्हतमतेर्हतां द्विधा सङ्गतागमविवेकलोकनैः ।
साधिताधिकृतसज्जनैर्मुदा भुक्तिमुक्तिसुखसम्पदे जयेत् ॥१६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रैलोक्ये लोकालोकप्रकटसरसतापुष्टिसृष्टिप्रकृष्टा

दिव्यश्रीः सत्यजात्यामृतरसलहरी पापतापोपशान्तौ ।

मुक्तिश्रीसन्धिदूतीहितनिखिलसुखाकर्षणस्वर्गिरत्नम्

देयादानन्दसम्पत्पदमुदिततमं सा सपर्या जिनानाम् ॥१७॥

यस्तनोत्युदितसम्पदे मुदा सर्वसार्वचरणार्चमम्बुजैः ।

तन्तनीति सततं ततां श्रियम्, स्वात्मनीह स नरो भवे भवे ॥१८॥

यः श्रीसार्वसपर्ययेति तु तयाऽऽत्मानं पुनात्यार्हता--

नन्तार्हहितसम्पदर्पणतया पूर्वद्युरत्नाभया ।

सेवन्ते तमुदारहर्षविनयश्रीसूरितं सर्वदा

नन्दस्पन्दमहोदयाः समुदिताः श्रीधर्महंसश्रियः ॥१९॥

॥ इति श्रीतीर्थराजाधिराजपूजातिशयस्तोत्रम् ॥

* *

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अथ भक्तामरनामकं स्तोत्रम् ॥

भक्तामरप्रणतमौलिमणिप्रभाणा, मुद्द्योतकं दलितपापतमोवितानम् ।
सम्यक् प्रणम्य जिन पादयुगं युगादा, वालंबनं भवजले पततां जनानाम् ॥१॥

यः संस्तुतः सकलवाङ्मयतत्त्वबोधा, दुद्भूत बुद्धिपटुभिः सुरलोकनाथैः ।
स्तोत्रैर्जगत्त्रितय चित्तहरैरुदारैः, स्तोष्ये किलाहमपि तं प्रथमं जिनेंद्रम् ॥२॥

बुद्ध्या विनापि विबुधार्चितपादपीठ ! स्तोतुं समुद्यत मतिर्विगतत्रपोऽहम् ।
बालं विहाय जलसंस्थितमिंदुबिंब, मन्यः क इच्छति जनः सहसा ग्रहीतुम् ॥३॥

वक्तुं गुणान् गुणसमुद्रशशांककांतान्, कस्ते क्षमः सुरगुरुप्रतिमोपि बुद्ध्या ।
कल्पांतकालपवनोद्धतनक्रचक्रं, को वा तरीतुमलमंबुनिधिं भुजाभ्याम् ॥४॥

सोऽहं तथापि तव भक्तिवशान्मुनीश, कर्तु स्तवं विगतशक्तिरपि प्रवृत्तः ।
प्रीत्यात्मवीर्यमविचार्य मृगो मृगेन्द्रं, नाभ्येति किं निजशिशोः परिपालनार्थम् ॥५॥

अल्पश्रुतं श्रुतवतां परिहासधाम, त्वद्भक्तिरेव मुखरीकुरुते बलान्माम् ।
यत्कोकिलः किल मधौ मधुरं विरौति, तच्चारुचूतकलिकानिकरैकहेतुः ॥६॥

त्वत्संस्तवेन भवसंततिसन्निबद्धं, पापं क्षणात् क्षयमुपैति शरीरभाजाम् ।
आक्रांतलोकमलिनीलमशेषमाशु, सूर्यांशुभिन्नमिव शार्वरमधकारम् ॥७॥

मत्वेति नाथ तव संस्तवनं मयेद, मारभ्यते तनुधियापि तव प्रभावात् ।
चेतो हरिष्यति सतां नलिनीदलेषु, मुक्ताफलद्युतिमुपैति ननूदबिंदुः ॥८॥

आस्तां तव स्तवनमस्तसमस्तदोषं, त्वत्संकथापि, जगतां दुरितानि हंति ।
दूरे सहस्रकिरणः कुरुते प्रभैव, पद्माकरेषु जलजानि विकासभांजि ॥९॥

नात्यद्भुतं भुवनभूषणभूतनाथ, भूतैर्गुणैर्भुवि भवंतमभिष्टुवंतः ।
तुल्या भवंति भवतो ननु तेन किं वा, भूत्याश्रितं य इह नात्मसमं करोति ॥१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्टवा भवंतमनिमेषविलोकनीयं, नान्यत्र तोषमुपयाति जनस्य चक्षुः ।
पीत्वा पयः शशिकरद्युतिदुग्ध सिंधोः, क्षारं जलं जलनिधेरशितुं क इच्छेत् ॥११॥

यैः शांतरागरुचिभिः परमाणुभिस्त्वं, निर्मापितस्त्रिभुवनैकललामभूत ।
तावंत एव खलु तेप्यणवः पृथिव्यां, यत्ते समानमपरं नहि रूपमस्ति ॥१२॥

वक्त्रं क्व ते सुरनरोरगनेत्रहारि, निःशेषनिर्जितजगत्त्रितयोपमानम् ।
बिंबं कलंकमलिनं क्व निशाकरस्य, यद्वासरे भवति पांडुपलाशकल्पम् ॥१३॥

संपूर्णमंडल शशांककलाकलाप, शुभ्रागुणास्त्रिभुवनं तव लंघयंति ।
ये संश्रितास्त्रिजगदीश्वरनाथमेकं, कस्तान्निवारयति संचरतो यथेष्टम् ॥१४॥

चित्रं किमत्र यदि ते त्रिदशांगनाभि, र्नीतं मनागपि मनो न विकारमार्गम् ।
कल्पांतकालमरुता चलिताचलेन, किं मंदराद्रिशिखरं चलितं कदाचित् ॥१५॥

निर्धूमवर्त्तिरपवर्जिततैलपूरः, कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि ।
गम्यो न जातु मरुता चलिताचलानां, दीपोऽपरस्त्वमसि नाथ जगत्प्रकाशः ॥१६

नास्त कदाचिदुपयासि न राहुगम्यः, स्पष्टीकरोषि सहसा युगपज्जगंति ।
नांभोधरोदरनिरुद्धमहाप्रभावः, सूर्यातिशायिहिमासि मुनींद्र लोके ॥१७॥

नित्योदयं दलितमोहमहांधकारं, गम्य न राहुवदनस्य न वारिदानाम् ।
विभ्राजते तव मुखाब्जमनल्पकांति, विद्योतयज्जगदपूर्वशशांकबिंबम् ॥१८॥

किंशर्वरीषु शशिनाह्नि विवस्वता वा, युष्मन्मुखेन्दुदलितेषु तमस्सु नाथ ।
निष्पन्नशालिवनशालिनि जीवलोके, कार्यंकियज्जलधरैर्जलभारनम्रैः ॥१९॥

ज्ञानं यथा त्वयि विभाति कृतावकाशं, नैवं तथा हरिहरादिषु नायकेषु ।
तेजः स्फुरन्मणिषु याति यथा महत्त्वं, नैवं तु काचशकले किरणाकुलेपि ॥२०॥
मन्ये वरं हरिहरादय एव दृष्टा, दृष्टेषु येषु हृदयं त्वयि तोषमेति ।
किं वीक्षितेन भवता भुवि येन नान्यः, कश्चिन्मनो हरति नाथ भवांतरेपि ॥२१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्रीणां शतानि शतशो जनयंति पुत्रान्, नान्या सुतं त्वदुपमं जननी प्रसूता ।
सर्वा दिशो दधति भानि सहस्ररश्मिं, प्राच्येव दिग्जनयति स्फुरदंशुजालम् ।।२२।।

त्वामामनंति मुनयः परमं पुमांस, मादित्यवर्णममलं तमसः परस्तात् ।
त्वामेव सम्यगुपलभ्य जयंति मृत्युं, नान्यः, शिवः शिवपदस्य मुनींद्र पंथाः ।।२३

त्वामव्ययं विभुमचिंत्यमसंख्यमाद्यं, ब्रह्माणमीश्वरमनंतमनंगकेतुम् ।
योगीश्वरं विदितयोगमनेकमेकं ज्ञानस्वरूपममलं प्रवदंति संतः ।।२४।।

बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधात्, त्वं शंकरोसि भुवनत्रयशंकरत्वात् ।
धातासि धीर शीवमार्ग विधेर्विधानात्, व्यक्तं त्वमेव भगवन् पुरुषोत्तमोऽसि।।२५।।

तुभ्यं नमस्त्रिभुवनार्त्तिहराय नाथ, तुभ्यं नमः क्षितितलामलभूषणाय ।
तुभ्यं नमस्त्रिजगतः परमेश्वराय, तुभ्यं नमो जिनभवोदधिशोषणाय ।।२६।।

को विस्मयोऽत्र यदि नाम गुणैरशेषै, स्त्वं संश्रितो निरवकाशतया मुनीश ।
दोषैरुपात्त विविधाश्रय जातगर्वैः, स्वप्नांतरेऽपि न कदाचिदपीक्षितोसि ।।२७।।

उच्चैरशोकतरुसंश्रितमुन्मयूख, माभाति रूपममलं भवतो नितांतम् ।
स्पष्टोल्लसत्किरणमस्ततमोवितानं, बिंबं रवेरिव पयोधरपार्श्ववर्ति ।।२८।।

सिंहासने मणिमयूखशिखाविचित्रे, विभ्राजते तव वपुः कनकावदातम् ।
बिंबं वियद्विलसदंशु–लतावितानं, तुंगोदयाद्रिशिरसीव सहस्ररश्मेः ।।२९।।

कुंदावदात–चलचामरचारुशोभं, विभ्राजते तव वपुः कलधौतकांतम् ।
उद्यच्छशांकशुचिनिर्झरवारिधार, मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ।।३०।।

छत्रत्रयं तव विभाति शशांककांत, मुच्चैः स्थितं स्थगितभानुकरप्रतापम् ।
मुक्ताफलप्रकरजालविवृद्धशोभं, प्रख्यापयत्त्रिजगतः परमेश्वरत्वम् ।।३१।।

उन्निद्रहेमनव–पंकजपुंजकांति, पर्युल्लसन्नखमयूख शिखाभिरामौ ।
पादौ पदानि तव यत्र जिनेंद्र धत्तः, पद्मानि तत्र विबुधाः परिकल्पयंति ।।३२।।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्थं यथा तव विभूतिरभूज्जिनेंद्र, धर्मोपदेशनविधौ न तथा परस्य ।
यादृक् प्रभा दिनकृतः प्रहतांधकारा, तादृक्कुतो ग्रहगणस्य विकाशिनोपि ॥३३॥

श्च्योतन्मदाविलविलोलकपोलमूल, मत्तभ्रमद् भ्रमरनादविवृद्धकोपम् ।
ऐरावनाभमिभमुद्धतमापततं, दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥३४॥

भिन्नेभकुंभगलदुज्ज्वलशोणिताक्त, मुक्ताफलप्रकरभूषितभूमिभागः ।
बद्धक्रमः क्रमगतं हरिणाधिपोऽपि, नाक्रामतिक्रमयुगाचलसंश्रितं ते ॥३५॥

कल्पांनकालपवनोद्धतवह्निकल्पं, दावानलं ज्वलितमुज्ज्वलमुत्फुलिंगम् ।
विश्वं जिघत्सुमिव संमुखमापततं, त्वन्नामकीर्त्तनजलं शमयत्यशेषम् ॥३६॥

रक्तेक्षणं समदकोकिलकंठनीलं, क्रोधोद्धतं फणिनमुत्फणमापततम् ।
आक्रामति क्रमयुगेन निरस्तशंक, स्त्वन्नामनागदमनी हृदि यस्य पुंसः ॥३७॥

वल्गत्तुरंगगजगर्जितभिमनाद, माजौ बलं बलवतामपि भूपतीनाम् ।
उद्यद्दिवाकरमयूखशिखापविद्धं त्वत्कीर्त्तनात्तम इवाशुभिदामुपैति ॥३८॥

कुंताग्रभिन्नगजशोणितवारिवाह, वेगावतारतरणातुरयोधभीमे ।
युद्धे जयं विजितदुर्जयजेयपक्षा, स्त्वत्पादपंकजवनाश्रयिणो लभंते ॥३९॥

अंभोनिधौ क्षुभितभीषणनक्रचक्र,-पाठीनपीठभयदोल्बणबाडवाग्नौ ।
रंगत्तरंगशिखरस्थितयानपात्रा, स्त्रासं विहाय भवतः स्मरणाद् व्रजंति ॥४०॥

उद् भूतभीषणजलोदरभारभुग्नाः शोच्यां दशामुपगताश्च्युतजीविताशाः ।
त्वत्पादपंकजरजोमृतदिग्धदेहा, मर्त्या भवंति मकरध्वजतुल्यरूपाः ॥४१॥

आपादकंठमुरुशृंखलवेष्टितांगा, गाढं बृहन्निगडकोटिनिघृष्टजंघाः ।
त्वन्नाममंत्रमनिशं मनुजाः स्मरंतः सद्यः स्वयं विगतबंधभयाभवन्ति ॥४२॥

मत्तद्विपेन्द्रमृगराजदवानलाहि, संग्रामवारिधिमहोदर बन्धनोत्थम् ।
तस्याशु नाशमुपयाति भयं भियेव, यस्तावकं स्तवमिमं मतिमानधीते ॥४३॥

स्तोत्रस्रजं तव जिनेंद्रगुणैर्निबद्धां, भक्त्या मया रुचिरवर्ण विचित्रपुष्पाम् ।
धत्ते जनो य इह कंठगतामजस्रं, तं मानतुंगमवशा समुपैति लक्ष्मीः ॥४४॥

इति भक्तामरनामकस्तोत्रं सप्तमं स्मरणम् ॥९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ।। ऋषभजिन-स्तवनम् ।।

( राग भैरवी त्रिताल)

ऋषभजिनेश ! महासुखदायक !
दीनदयाकर ! दीव्यतनो !
परमानन्दनिकेतन ! भक्तो-
द्धारक हे गुणरत्ननिधे ध्रुव ! ।। ऋषभ० ।।१।।

नौमि सदा भवभेद ! छेदक !
कर्मकलङ्कवृतेः शिव हे
दुर्गतिदारक ! शान्तिसुधाकर !
भवजलतारक ! शुद्धगते ! ।। ऋषभ० ।।२।।

जगदाधार जगज्जनवल्लभ,
सुरगणसेवितभव्यरुचे !
हे कर्मारिनिवारक ! सारक !
दीर्घसुखस्य निरञ्जन हे ! ।। ऋषभ० ।।३।।

सिद्धसनातन धामविराजक !
शरणागत जनवत्सल हे !
दान्तसुशान्त मनोजविकार !
क्षेमविधान विशालमते ! ।।ऋषभ०।।४।।

भवभयभञ्जन निर्जररञ्जन !
सज्जनसद्गतिदायक हे !
दुरितमहाद्रुमकुञ्जर पञ्जर,
पुण्ययशुकस्य सुराधिपते ! ।।ऋषभ०।।५।।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ।। श्रीसिद्धाचलमण्डन श्रीयुगादि जिनस्तवनम् ।।

(शार्दूलविक्रीडितवृत्तम् )

श्रेयः श्रीसदनं प्रशान्तवदनं संसारविच्छेदन,
मोहद्रोहिनिकन्दनं भवभृतां नित्यं सुखोत्पादनम् ।
पुण्यस्वर्द्रुमनन्दनं विमदनं दौर्गत्यनिर्भेदनं,
श्रीशत्रुञ्जयमण्डनं सदवनं नाभेयमीडे जिनम् ।।१।।

श्रेयः कर्तरि हर्तरि दुतमघं शोभामलं धर्त्तरि,
पुण्यं भर्त्तरि भेत्तरीह भविनां दौःस्थ्यं भवं छेत्तरि ।
मोक्षं दातरि शं विधातरि गुणग्रामं च निर्मातरि,
श्रीनाभेयजिनक्रमाम्बुजयुगे भूयान्मुदा मे नुतिः ।।२।।

सम्यक्त्वं रचयन् सुखं किसलयन् संसारमुच्छेदयन्,
दौर्गत्यं दलयन्नघं विघटयन् मिथ्यात्वमुन्मर्दयन् ।
पुण्यं पल्लवयन् मुदं प्रकटयन् मोक्षश्रियं सूत्रयन्,
श्रीशत्रुञ्जयमण्डनं विजयतेऽर्हन् नाभिभूपालम् ।।३।।

यत्सेवा द्विसद्मगौर्भवभृतां चिन्तातिगां सद्मनि,
श्रेयः श्रेणिमहर्निशं वितनुते दूरीकरोत्यापदः
श्रीमन्नाभिनरेन्द्र वंशकमलालङ्कार चूडामणि,
तं शत्रुञ्जयमण्डनं जिनपतिं स्तौम्यादिमं सादरम् ।।४।।

श्रेयस्तं श्रयते यशश्च यतते तं नित्यमासेवितुं,
बुद्धिस्तं भजते सदा सुमनसं सौख्यं समालिङ्गति ।
दौर्भाग्यं न निरीक्षते तमनिशं नो दौःस्थ्यमालोकते,
यः सिद्धाचलतीर्थपं प्रणमति श्रीमारुदेवं जिनम् ।।५।।

श्रेयः कामगवीं स दोग्धि विगलत्पापप्रपञ्चः सुधीः,
स्फुर्जत्केवलमालिनं च सततं तं वष्टि मोक्षेन्दिरा ।
नौति स्तौति च तं सुरासुरनरश्रेणि सुभक्त्याऽनिशं,
यः सिद्धाचलनायकं प्रणमति श्रीनाभिभूपाङ्गजम् ।।६।।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुःखं तं विजहाति मुक्तिललना धत्ते च तं चेतसि,
सङ्गं तस्य बिभर्त्ति बुद्धिरमला नित्यं समानन्दिता ।
तस्माद् दुष्टमघं बिभेति तमहो तोतूर्त्ति शं सेवितुं,
यः सिद्धांचलमण्डनं जिनपतिं श्रीनाभिजं सेवते ॥७॥

पापं नश्यति तस्य शुष्यतितमां संसारवारांनिधि-
र्मोहः शाम्यति तस्य शुद्धमनासोऽभीष्टं च संसिद्ध्यति ।
तस्य भ्रश्यति दुःखसन्ततिररं चेतश्च संशुद्ध्यति,
यः स्तौति प्रथमं जिनेशमनिशं श्रीसिद्धशैलेश्वरम् ॥८॥

सद्धर्मं चिनुते दुनोति च दरं पापं पिनष्टि द्रुतं
दौर्भाग्यं च रुणद्धि कर्मपटलं भिन्ते तनोति श्रियम् ।
पुष्णातीतदरं सुखं तु विमला यस्यार्चना देहिनां
तं सिद्धाचलनायकं जिनपतिं श्रीमारुदेवं श्रये ॥९॥

यत्सेवा दुरितं प्रणाशयति च श्रेयांसि विस्तारय-
त्युच्चैः प्राणभृतां समर्पयति च त्रैलोक्यलोकार्चनाम् ।
यद्वाग् मोक्षपथं दिशत्यसुमतां दुःखोच्चयं वृश्चति
तं सिद्धाचलशृङ्गमण्डनमरं नाभेयमीडे जिनम् ॥१०॥

भृत्यन्ति द्युसदो द्विषत् स्वजनति प्राणस्पृशामन्वहं
यत्पादार्च(नभा)स्त्रजत्यहिरहो गेहायते काननम् ।
काम्यन्तेऽनिशमङ्गिनः सुमनसो यत्सेवका मुक्तिना
तं सिद्धाचलतीर्थपं प्रणमत श्रीमारुदेवं जिनम् ॥११॥

चर्कर्त्ति द्युसदां गणः प्रतिपदं यत्सेवनं सादरं
जेगीयन्त इह प्रमाणपटवः कीर्तिं च यस्याऽमलाम् ।
नित्यं मेऽपि मनश्चिकीर्षतितरां यस्याऽर्हतो दर्शनं
तं सिद्धाचलमण्डनं भजत भो ! भक्त्या वृषाङ्कजिनम् ॥१२॥

अमरविजयपादाम्भोजभृङ्गादमानश्चतुरविजय इत्थं मारुदेवं जिनेन्द्रम् ।
विमलशिखरिनाथं तुष्टुवेऽश्वर्षिनन्दशशिशरदिषमाघश्यामपक्षेचतुर्थ्याम् ॥१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्री ऋषभजिन स्तुतयः

### १

(हरिणीप्लुतछन्दः)

श्री नाभेयं योगिध्येयं देहज्योतिः सारङ्गं,
सर्वश्रेयः श्रेयः पद्यागत्यामाद्यत्सारङ्गम् ।
कर्मक्षोणीजन्मश्रेणी श्रेणीध्वंसे सारङ्ग,
नौम्युत्कण्ठाव्याप्तस्वान्तः सौवस्याम्ना सारङ्गम् ॥१॥
अर्हद्वृन्दं क्लृप्ताऽऽनन्दं चञ्चच्चक्षुः सारङ्गं,
विश्वाऽमर्त्यव्याधाऽऽदित्यछायाभेदे सारङ्गम् ।
क्षामाऽक्षेमं दक्षक्षोणीकौमुद्या मुत्सारिङ्गं,
श्रेयोरत्याः कण्ठाश्लेषे स्तोष्ये नन्दत्सारङ्गम् ॥२॥
स्तौम्यध्वान्तं ध्वस्तध्वान्तं श्रीसिद्धान्तं सारङ्ग,
भव्याऽम्भोजेष्वाविर्भूताऽऽनन्दाऽम्भोरुद् सारङ्गम् ।
अज्ञानाऽऽलीपाथोदालीशत्या दृप्यत्सारङ्ग,
वन्दारुणां भीदारुणां वक्षोवृक्षे सारङ्गम् ॥३॥
जैनाऽध्यक्षं दक्षं सुष्ठुछायासारङ्गं,
सौव्या वाण्या गाम्भीर्येण ध्वस्तोद्गर्जत्सारङ्गम् ।
अर्हत्सर्पद्वाक्योद्गर्जन्याऽम्भः सारङ्गं,
वन्दे क्रीडाकामक्रीडाकासार श्रीसारङ्गम् ॥४॥

### २

(उपजातिः)

सज्ज्ञानलक्ष्म्याः सुनिवेशनार्थं, सन्मण्डपत्याशु समाऽऽगमोत्था ।
लसद्यदंसोपरि केशवल्ली, सदा मुदे वः स युगादिदेवः ॥१॥
त्रैलोक्यलक्ष्म्या वृतये स्वयं या, सम्मण्डपत्यार्हतचैत्यराजी ।
साऽनित्यनित्या नमतां नृणां स्यादनित्यनित्याय सुखाय नित्यम् ॥२॥
सत्तीर्थलक्ष्म्या विशतौ हि रङ्गात्, श्रीमण्डपत्यास्तृतसूत्रितं यत्
तदस्तु मे जैनीवचः प्रपञ्चि सुवाचनं प्रावचनं सुवाचौ ॥३॥
श्रीसङ्घलक्ष्म्या सुचिरं सदा ये, समण्डपन्तीह सुराऽपुरीभिः ।
सङ्ख्यावृत्तव्यावृतभावभावाः, सुदृष्टयः सन्तु सुदृष्टये ते ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३

(उपजाति)

श्रीनाभिसुनो वस सिद्धपूर्या, निःशेषशर्मावलिपूरिताम् ।
दुष्टाष्टकर्माऽवनिभृद्विनाश — सुखाऽशनाधीश्वरसिद्धिदाता ॥१॥
समस्ततीर्थप्रभवः प्रकृष्ट-प्रभावयुक्ता ददतां सतां शम् ।
मुखप्रभाबाधितशीतपादाः, समर्त्यशक्राळिनिषेव्यमानाः ॥२॥
राधान्त एष प्रकारोतु सिद्धिं, क्षीणाऽष्टकर्माऽऽननपद्मजातः ।
निर्देशतस्तीर्थकृतां गणेशाः, सूत्रं यदीयं रचयाम्बभूवुः ॥३॥
चक्रेश्वरी सा मम मङ्गलाऽऽली-महर्निशं मङ्क्षु सुरि तनोतु ।
सूरीश्वरीऽऽनन्दगुरोर्गणे या, समीहितं राति सुहंसवाणी ॥४॥

४

(शार्दूलविक्रीडितम्)

श्रीसोपारकपत्तनाऽद्भुतरमारामाशिरः शेखरं,
श्रीनाभिक्षितिपालवंश कमल प्रोल्लासने भास्करम् ।
माद्यन्मोहमदाऽष्टकक्षयकरं मोक्षाऽध्वनिस्पन्दनं,
भक्त्याऽऽदीशजिनं स्तुवे प्रतिदिनं श्रीजीवितस्वामिनम् ॥१॥
पञ्चैरावतपञ्चभारतमुखक्षेत्रेषु ये संस्थिता,
भूताऽनागतवर्तमानजिनपा विश्वत्रयीवन्दिताः ।
लोकाऽलोकविलोकिकेवलमहाज्ञानश्रिया संश्रिता—
स्तेषां श्रीपदपङ्कजं भवभिदे भूयाज्जिनानां सदा ॥२॥
श्रीसिद्धान्ततरुः पदत्रयमहामूलोऽखिलाङ्गस्फुर—
च्छायाभिः समलङ्कृतो वरवरोपाङ्गप्रशाखाऽन्वितः ।
अर्थश्रेणिसुगन्धिपुष्पनिकरैः संवासिताऽऽशामुखो,
देयान्मोक्षफलं जरामृतिहरं भव्यावलीना सदा ॥३॥
श्रीमन्नादिजिनेन्द्रपादकमलप्रोद्यन्नखालीविभा—
श्रेणीनव्यपरागपूरमधुपः श्रीगोमुखो यक्षराट् ।
विघ्नौघप्रबलाऽन्धकारनिकरप्रध्वंसनेऽहर्मणि—
र्भव्यानां सततं तनोतु विशदा नानाविधाः सम्पदः ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५

( वसन्ततिलकावृत्तम् )

श्री कुङ्कणख्यविषयस्थितपत्तनश्री—
सोपारकाऽवनितलामलभूषणाऽऽभ !
श्रीमद्युगादिजिननायक ! मौलिनाऽहं,
भक्त्या वहे तव पदाऽब्जयुगं जिनेश ! ॥१॥

राज्यं विहाय सकलं तृणवद् गृहीतः,
श्रीसंयमो नरसुराऽसुरसाक्षिकं यैः ।
ते तीर्थपा ऋषभदेवमुखाः सुखानि,
त्रैलोक्यलोकनिवहस्य सदाऽपि दद्युः ॥२॥

श्रीतीर्थनाथमुखपङ्कजजन्मभूमि—
मोहान्धकारनिकुरम्बविनाशभानुः ।
उद्भासिताऽखिलजगत्त्रितयस्वरूपः,
श्रीआगमो दिशतु मे शिवसौख्यलक्ष्मीम् ॥३॥

सोपारकप्रवरतीर्थपतेः पदाब्जं,
या सेवते मधुकरीव मुदा सदापि ।
चक्रेश्वरीसुरसुरीनिकरेण सेव्या,
सा सङ्घलोकनिवहस्य सुखं चिनोतु ॥४॥

६

( तोटकम् )

विमलाचल भूषणमादिजिनं, जिननूतविशुद्धगुणप्रकरम् ।
करणं महसां विनम्याम्यभवं, भवनं यशसां तम संहरणम् ॥१॥

कर्म मनोभवतापहरं, हरतात्प्रतिपात कृतां विपदः ।
पदकोमलताजितसत्कमलं, मलदुःखहरं भगवद्विसरम् ॥२॥

सरसं वचनं भुवि भागवतं बतये श्रुतिगोचरमादधति ।
दधदङ्ग भृतां प्रबलं विभवं, भवदुच्चतमोहतये सततम् (?) ॥३॥

ततकान्तिधरो विदधाति महं, महनीय वपुर्लतिको जगति ।
गतिभिश्च जयन्मदिनं द्विरदं, रदनाग्रयमुखः सुरगोमुखकः ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७

(द्रुतविलम्बित)

विमलशैलविशालविभूषणं, प्रथम तीर्थपतिं गतदूषणं ।
प्रणत पञ्जना(?)ऽमरनायका, निखिल विघ्नविनाशविनायकाः॥ १॥
जिनवरा गुणवृन्द कलालयाऽप्रतिमतां दधतः कमलालयः ।
विदधतं दुरितव्रजनाशनं, नरक दुष्टगताव्रजनाशनम् ॥२॥
जगति भागवति वरभारती, जनयति श्रुतियामलभारती ।
जनशुभाशुभभेद विधायिका, सुखकरी न भवेद्बहुधायिका ॥३॥
जनयतादिह गुह्यकपर्दिकः, कृतपरासुरकान्तिकपर्दिकः ।
सकलसङ्घ विपत्ति कदम्बक-क्षयकरः सरसीज सदम्बकः ॥४॥

८

(द्रुतविलम्बित)

विमलशैलविशालमतङ्गज—
प्रवरमूर्ध्निपुरन्दर सन्निभः ।
विजयते प्रथमो जिनपुङ्गवो,
नरसुरासुरनाथ नमस्कृतः ॥१॥
इषुमितमुनिकोटयासंयुतः पुण्डरीकः,
प्रथम जिनगणेशो यत्रमुक्तिं प्रपन्नः ।
सकल जिनवरायं तीर्थराजं स्तुवन्ति,
स भवतु मम नित्यश्रेयसे पुण्डरादिः ॥२॥
सिद्धाचलेमुनिगणा अपुनर्भवत्वं,
प्राप्पापदं जननमृत्यु विनाशि यत्र ।
जैनगमेषु विदितोऽस्ति महाप्रभावः
तस्यैव तीर्थनृपतेः कथितो जिनेन्द्रैः ॥॥३॥
शत्रुञ्जयं प्रणमतां वरदानदक्षा
चक्रेश्वरीकवडगोमुखयक्षमुख्याः ।
सर्वार्थसिद्धिकरणोदयहर्षयुक्त ।
कुर्वन्तु सङ्घ कुशल जिनधर्म रक्ताः ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



९

(कामक्रीडावृत्तम्)

उद्यन्सारं शोभागारं पुण्याधारं श्रीसारं
श्रेयस्कारं नित्योदारं कान्ताकारं निर्भारम्
प्रेक्षावन्तं वन्देऽहं तं प्रोद्यन्दन्तं श्रीमन्तं
रम्भागेयो मोहाजेयो बुद्धयध्येयो नाभेयः ॥१॥

सेव्यं व्यक्ते नित्यासक्ते श्रद्धायुक्ते सद्भक्तैः
ज्योतिस्तारं चर्चाचारं सद्योदारं दातारम्
सार्वव्रातं व्यस्तासातं बुद्धयध्यातं विख्यातं
विद्यावृन्दं वन्यऽमन्दं सम्पत्कन्दं सानन्दम् ॥२॥

स्तोष्येऽहं संतापध्वंसं स्फुर्जच्छंसंसिद्धंतं
नित्याह्लादं सन्तोन्मादं सद्विद्यादं सद्वादम् ।
श्रीसिद्धान्तं स्पष्टीमन्तं कामंकान्तं कामान्तं
भव्यैर्ध्येयं जालामेयं ज्ञानादेयं मोहयम् ॥३॥

चक्रेश्वर्या-चञ्चच्चर्या रोचिर्वेर्या सत्कार्या
जैनाद्दिष्टा नष्टारिष्टा सर्वोत्कृष्टास्वर्ग्येष्ठा
शोभासारा सालङ्कारा रम्याहारा गीस्तारा
सङ्घस्फारा-ज्येयादारा हृत्यत्तारा भूत्यैस्तात् ॥४॥

१०

तोटकवृतम्

वरमुत्तियहार सुतारगणं, परचित्तकलत्त सपत्तधणं ।
पय पंकज छप्पय देवगणं, श्री अब्बुय वंदुं आदिजिणं ॥१॥

तियलोय नमंसियपायजुआ, घणमोहमहीरुहमुत्तिगया ।
परिपालिअ निच्चल जीवदया, ममहुंतु जिणागम सुक्खमया ॥२॥

इगयंगि महातमरोरहरं, कल्लाणपयोरुहबुद्धिकरं ।
सुहमग्गकुमग्गपयासकरं, पणमामि जिणागममन्हिकरं ॥३॥

सिरिइंद समुज्जलगायलया, सुहझाण विणम्मिय रंगलया ।
असुरिंद सुरेंदसुरप्पया, मम वाणि सुहाणि कुणेसुरुया ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



११

( अनुष्टुभ् )

युगादि पुरुषेन्द्राय युगादि स्थिति हेतवे ।
युगादि शुद्ध धर्माय युगादि मुनये नमः ॥१॥
ऋषभाद्यावर्द्धमानान्ता जिनेन्द्रा दश पञ्च च ।
त्रिकवर्ग समायुक्ता दिशन्तु परमां द्युतिम् ॥२॥
जयति जिनोक्तो धर्मः षड्जीवनिकायवत्सलो नित्यम् ।
चूडामणिस्त्रिलोके विभाति यः सर्व धर्माणाम् ॥३॥
सा नो भवतु सुप्रीता निद्धूतकनकप्रभा ।
मृगेन्द्रवाहनानित्यं कूष्माण्डीकमलेक्षणा ॥४॥

१२

(वसन्ततिलकावृत्तम्)

गीर्वाणमौलिकमणिरत्नशिखाकलाप–
चञ्चन्मरीचिनिचयाऽर्चितपादपिठम् ।
चामीकरद्युति समप्रभविश्वनाथं
प्रातः प्रणौमि परमेश्वर नाभिसूतम् ॥१॥
क्षीरोदवारिपरिपूर्णमहासुगन्ध–
मत्तभ्रमद्भ्रमर गुञ्जरवाऽभिरामैः
ये स्नापिताः सुरगिरौ मणिरत्नकुम्भैः
शक्रैर्जिनाः प्रवितरन्तु हितानि नस्ते ॥२॥
स्याद्वादमीमनखचक्रविराजितांऽह्रिः
सत्साधुकारिमुखपञ्जरमध्यवासी ।
गर्जन् कुवादिकलिकुञ्जर दर्पभेदी
जैनाऽऽगमो जयतु केसरिवत्प्रभाते ॥३॥
दर्पोद्धतद्विरदपृष्ठमधिष्ठितो यः
स्फारस्फुरत् रुचिरत्नकिरीटकोटीः
नानामणिप्रकररञ्जितपादपीठः
प्रातस्तनोतु मम शर्म कपर्दियक्षः ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथश्री शत्रुञ्जयमण्डन–आदिजिन स्तुति ।

(स्रग्धराछन्दः)

शैले शत्रुञ्जयाऽऽख्ये भुवजलधिपतज्जन्तु पोतायमाने,
चैत्ये चञ्चत्पताकाप्रकटसितपटेकूपकाऽऽभे गुणाऽऽढ्ये ।
नेतुं पोर परस्मिन्–शिवनगरमहाराज्य लाभाय लोकं
कुर्वन्नियामिकत्वं जयति जिनपतिर्नाभि भूपालसूनुः ॥१॥
यत्पादाम्भोजरेणुस्तवक तिलकिता भाविनो भावनाश्रा,
भुक्ते मुक्तेश्च लक्ष्म्याः– स्फुटमिह शुभगं भावुकत्वंवीन्ति ।
ते संतो भाव्यतीता–विमलकिरि महाश्रृङ्गश्रृङ्गारकाः(ये)
पायासुर्लोक सारा–जिनवर वृषभाः क्लू प्रविश्वोपकाराः ॥२॥
शैले श्रीपुण्डरीके समवसृति–मुखान् उन्नतैर्यद् घनाभै–
र्भव्यानानन्दयद्भिः—शिखिन इव लसद्देशनागर्जि तेन ।
उद्गीर्णं तीर्थराजैः श्रुतममृतमिदं बोधिबीजानुरूपं,
श्रेयः सम्पत्फलाढ्यं प्रथयतु सुकृताङ्कुरपूरं जगत्याम् ॥३॥
पुण्यात्पुण्यानुबन्धान्निय–मलवभवात् पूर्वजन्मानुचीर्णात्,
देवत्वं प्राप यः श्रीविमल गिरि–महातीर्थे सेवा पवित्रम् ।
कल्याणी भक्ति रूपै–प्रथमजिनपतेः पादपद्मार्चनेऽसौ,
श्रीयक्षेशः कपर्दी भवतु भवभृतां भूतये शान्तये नः ॥४॥

## चैत्यवन्दनम्

श्रीसिद्धसेनदिवाकर प्रणीतं श्रीसिद्धगिरिस्थ दिदेवं चैत्यवन्दनम्

भव्याङ्गभृत्कोकिल पुण्डरीकं, दुष्कर्मरुक् छेदनपुण्डरीकम् ।
पद्भ्यां पवित्रीकृत पुण्डरीकम्, नताखिलखण्डल पुण्डरीकम् ॥१॥
उन्मत्तमोहद्विप पुण्डरीकम्, बाल्ये कृतार्थीकृत पुण्डरीकम् ।
शिरस्तुषाराङ्कधृतपुण्डरीकम्, त्वां स्तौमि चञ्चत् पद पुण्डरीकम् ॥२॥
स मङ्गलं वो वृषभध्वजः, कुर्याज्जटावलीसंवृतांशमण्डलः ।
यदीयमङ्गं किल सर्वमङ्गलाश्रितं प्रमोदाय न यस्य जायते ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## स्तोत्र १

### श्रीशुभशीलगणिविरचितं " नाभेयस्तोत्रम् "

सुरासुर महीनाथ-मौलिमालानत क्रमम् ।
श्री शत्रुंजयकोटीर-मणिं श्रीऋषभं स्तुवे ॥१॥
विभो ? त्वत्पादराजीवं, ये सेवन्ते जनाः सदा ।
सुरासुर नृपश्रेणिभजते तान् सुभक्तितः ॥२॥
तनोसि त्वं विभो ? यस्य, मानसे वासमन्वहम् ।
तस्य पापानि गच्छन्ति, तमांसीवदिनोदयात् ॥३॥
निरीक्ष्य त्वन्मुखाम्भोजं, सुरासुरसुखप्रदम् ।
कृतार्थोऽहम भूवं, श्री-नाभिभूपालनन्दन ? ॥४॥
सुवर्णवर्णसंकास-देहद्युति भरप्रभो ? ।
निजाङ्घ्रिकमलावासं देहिमे नाभिनन्दन ॥५॥

## स्तोत्र २

### श्रीशत्रुंजय महात्म्ये धनेश्वरसूरि प्रणीतं " जिन स्तोत्रम "

क्वाऽहं बुद्धिधनैर्हीनः, क्व च त्वं गुणसागरः ॥
तथापि त्वां स्तवीम्येषस्त्वद्-भक्ति मुखरी कृतः ॥१॥
त्वया हतास्तपोऽस्त्रेण, सर्वथाऽन्येन दुर्जयाः ।
रागाद्या रिपवः स्वामिन्नात्मनः स्वार्थघातकाः ॥२॥
रागाद्यै रिपुभिर्देवाभासा अन्ये विडम्बिताः ।
पश्यन्ति ते बहिः शत्रून् विहायान्तर्निकर्तिनः ॥३॥
अनन्त ज्ञान महात्म्य-वारिधे ? चतुर ? प्रभो ? ।
जगत्प्रदीप ? भगवन् ? नाभेय ? भवते नमः ॥४॥
अष्टाङ्गानि तथा नाथ ? भवान् योगस्य निर्ममे ।
यथा तानि प्रवर्तन्ते कर्माष्टकनिषिष्टये ॥५॥
शत्रुञ्जयशिरोरत्नं, श्रीनाभिकुल भास्करम् ।
स्वर्गापवर्ग द्वारनिदानं त्वां विभो ! स्तुमः ॥६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रत्नेन काञ्चनमिव तेजसैव नभोमणिः
अलङ्कृतं त्वया नाथ ? तीर्थं शत्रुञ्जयं हृदः ॥७॥
नाभ्यर्थये स्वर्जे सुखं न मोक्षं न नरश्रियम् ।
सदा त्वत्पादपद्मानि वसन्तु मम मानसे ॥८॥

## स्तोत्र ३

### " श्रीसिद्धाद्रिस्तोत्रम् "

श्री पुण्डरीकगणभृत्प्रथमं प्रपेदे, यं पुण्डरीकमिवमञ्जुलचञ्चरीकः ।
यं स्तौति पुण्डरकिणीनगरीस्थसार्वः तं पुण्डरीकगिरिनाथमहं नमामि ॥१॥

यत्राऽभवन् जिनगणेश्वर साधुसाः सङ्घा प्रशान्त दुरिता बहुकोटि संख्याः ।
तेनेदमास्पदमहो विमलं प्रसिद्धं युक्ताह्वयं विमलशैलमहं स्तुवेतम् ॥२॥

पापं व्यापोहति करोति समृद्धि भावं, दुक्खं छिनत्ति विपुलांश्रियमतनोति ।
पुण्यं दधाति वितनोति समोहितानि दृष्टोप्यसौ गिरिपतिः शुभदर्शनेन ॥३॥

तस्योपरि प्रवरतीर्थपतिर्वृषाङ्कोमुख्यो जिनेषु स यथागिरिषु प्रसिद्धः ।
तत्पाद पूजनपराभुविये नरा स्युः तेषां क्रमौत्रि भुवनान्यपि पूजयन्ति ॥४॥

नो व्याधिराधिरपि दुष्ट भुजङ्गमा नो, नो शाकिनी न परमेचिगणो न चाम्भः ।
नो वैरिणो न च नृपाः परितापयन्ति सिद्धोद्रिमण्डन युगादि जिनप्रसादात् ॥५॥

चिन्तामणिः सुरतरूः सुरधेनुकामकुभौ सुराश्च निखिला मयि सुप्रसन्नाः ।
जाताः स्वयं प्रबलसाधन यन्त्रिता वा, विदर्शनेन भवसंतति दुर्लभेन ॥६॥

अस्मिन् भवे परभवे निखिलेऽपिदेव ? पापानियानि विहितान्यहित प्रदानि ।
वाक्कायमानसभवानिमयाति मौढयात् त्वदर्शनेन वियलानि भवन्तु तानि ॥७॥

सूरीशहीरविजयस्य गुरोः प्रसादादित्थं स्तुत; सुविनयेन युगादिदेव ।
शत्रुंजयाद्रिशिखरे मुकुटोपमानो देयादसौ विपुलमञ्जुलमङ्गलालीः ॥८॥

★

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private And Personal Use Only